# Kapila Gita

# કપિલ ગીતા

## Document Information

Text title : kapilagita

File name : kapilagita.itx

Category : gItA, giitaa

Location : doc_giitaa

Description-comments : Avilable in Bhagvata Purana skandha 3, adhyaaya 23-33.

Latest update : March 3, 2007

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# Kapila Gita

# કપિલ ગીતા

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

૦૩૨૩૦૦૧૦ મૈત્રેય ઉવાચ

૦૩૨૩૦૦૧૧ પિતૃભ્યાં પ્રસ્થિતે સાધ્વી પતિમિઙ્ગિતકોવિદા

૦૩૨૩૦૦૧૨ નિત્યં પર્યચરત્પ્રીત્યા ભવાનીવ ભવં પ્રભુમ્

૦૩૨૩૦૦૨૧ વિશ્રમ્ભેણાત્મશૌચેન ગૌરવેણ દમેન ચ

૦૩૨૩૦૦૨૨ શુશ્રૂષયા સૌહૃદેન વાચા મધુરયા ચ ભોઃ

૦૩૨૩૦૦૩૧ વિસૃજ્ય કામં દમ્ભં ચ દ્વેષં લોભમઘં મદમ્

૦૩૨૩૦૦૩૨ અપ્રમત્તોદ્યતા નિત્યં તેજીયાંસમતોષયત્

૦૩૨૩૦૦૪૧ સ વૈ દેવર્ષિવર્યસ્તાં માનવીં સમનુવ્રતામ્

૦૩૨૩૦૦૪૨ દૈવાદ્ગરીયસઃ પત્યુરાશાસાનાં મહાશિષઃ

૦૩૨૩૦૦૫૧ કાલેન ભૂયસા ક્ષામાં કર્શિતાં વ્રતચર્યયા

૦૩૨૩૦૦૫૨ પ્રેમગદ્ગદયા વાચા પીડિતઃ કૃપયાબ્રવીત્

૦૩૨૩૦૦૬૦ કર્દમ ઉવાચ

૦૩૨૩૦૦૬૧ તુષ્ટોઽહમદ્ય તવ માનવિ માનદાયાઃ

૦૩૨૩૦૦૬૨ શુશ્રૂષયા પરમયા પરયા ચ ભક્ત્યા

૦૩૨૩૦૦૬૩ યો દેહિનામયમતીવ સુહૃત્સ દેહો

૦૩૨૩૦૦૬૪ નાવેક્ષિતઃ સમુચિતઃ ક્ષપિતું મદર્થે

૦૩૨૩૦૦૭૧ યે મે સ્વધર્મનિરતસ્ય તપઃસમાધિ

૦૩૨૩૦૦૭૨ વિદ્યાત્મયોગવિજિતા ભગવત્પ્રસાદાઃ

૦૩૨૩૦૦૭૩ તાનેવ તે મદનુસેવનયાવરુદ્ધાન્

૦૩૨૩૦૦૭૪ દૃષ્ટિં પ્રપશ્ય વિતરામ્યભયાનશોકાન્

૦૩૨૩૦૦૮૧ અન્યે પુનર્ભગવતો ભ્રુવ ઉદ્વિજૃમ્ભ

૦૩૨૩૦૦૮૨ વિભ્રંશિતાર્થરચનાઃ કિમુરુક્રમસ્ય

૦૩૨૩૦૦૮૩ સિદ્ધાસિ ભુઙ્ક્ષ્વ વિભવાન્નિજધર્મદોહાન્

૦૩૨૩૦૦૮૪ દિવ્યાન્નરૈર્દુરધિગાન્નૃપવિક્રિયાભિઃ

૦૩૨૩૦૦૯૧ એવં બ્રુવાણમબલાખિલયોગમાયા
૦૩૨૩૦૦૯૨ વિદ્યાવિચક્ષણમવેક્ષ્ય ગતાધિરાસીત્
૦૩૨૩૦૦૯૩ સમ્પ્રશ્રયપ્રણયવિહ્વલયા ગિરેષદ્
૦૩૨૩૦૦૯૪ વ્રીડાવલોકવિલસદ્ધસિતાનનાહ
૦૩૨૩૦૧૦૦ દેવહૂતિરુવાચ
૦૩૨૩૦૧૦૧ રાદ્ધં બત દ્વિજવૃષૈતદમોઘયોગ
૦૩૨૩૦૧૦૨ માયાધિપે ત્વયિ વિભો તદવૈમિ ભર્તઃ
૦૩૨૩૦૧૦૩ યસ્તેઽભ્યધાયિ સમયઃ સકૃદઙ્ગસઙ્ગો
૦૩૨૩૦૧૦૪ ભૂયાદ્ગરીયસિ ગુણઃ પ્રસવઃ સતીનામ્
૦૩૨૩૦૧૧૧ તત્રેતિકૃત્યમુપશિક્ષ યથોપદેશં
૦૩૨૩૦૧૧૨ યેનૈષ મે કર્શિતોઽતિરિરંસયાત્મા
૦૩૨૩૦૧૧૩ સિદ્ધ્યેત તે કૃતમનોભવધર્ષિતાયા
૦૩૨૩૦૧૧૪ દીનસ્તદીશ ભવનં સદૃશં વિચક્ષ્વ
૦૩૨૩૦૧૨૦ મૈત્રેય ઉવાચ
૦૩૨૩૦૧૨૧ પ્રિયાયાઃ પ્રિયમન્વિચ્છન્કર્દમો યોગમાસ્થિતઃ
૦૩૨૩૦૧૨૨ વિમાનં કામગં ક્ષત્તસ્તર્હ્યેવાવિરચીકરત્
૦૩૨૩૦૧૩૧ સર્વકામદુઘં દિવ્યં સર્વરત્નસમન્વિતમ્
૦૩૨૩૦૧૩૨ સર્વર્દ્ધ્યુપચયોદર્કં મણિસ્તમ્ભૈરુપસ્કૃતમ્
૦૩૨૩૦૧૪૧ દિવ્યોપકરણોપેતં સર્વકાલસુખાવહમ્
૦૩૨૩૦૧૪૨ પટ્ટિકાભિઃ પતાકાભિર્વિચિત્રાભિરલઙ્કૃતમ્
૦૩૨૩૦૧૫૧ સ્રગ્ભિર્વિચિત્રમાલ્યાભિર્મઞ્જુશિઞ્જત્ષડઙ્ઘ્રિભિઃ
૦૩૨૩૦૧૫૨ દુકૂલક્ષૌમકૌશેયૈર્નાનાવસ્ત્રૈર્વિરાજિતમ્
૦૩૨૩૦૧૬૧ ઉપર્યુપરિ વિન્યસ્ત નિલયેષુ પૃથક્પૃથક્
૦૩૨૩૦૧૬૨ ક્ષિપ્તૈઃ કશિપુભિઃ કાન્તં પર્યઙ્કવ્યજનાસનૈઃ
૦૩૨૩૦૧૭૧ તત્ર તત્ર વિનિક્ષિપ્ત નાનાશિલ્પોપશોભિતમ્
૦૩૨૩૦૧૭૨ મહામરકતસ્થલ્યા જુષ્ટં વિદ્રુમવેદિભિઃ
૦૩૨૩૦૧૮૧ દ્વાઃસુ વિદ્રુમદેહલ્યા ભાતં વજ્રકપાટવત્
૦૩૨૩૦૧૮૨ શિખરેષ્વિન્દ્રનીલેષુ હેમકુમ્ભૈરધિશ્રિતમ્
૦૩૨૩૦૧૯૧ ચક્ષુષ્મત્પદ્મરાગાગ્ર્યૈર્વજ્રભિત્તિષુ નિર્મિતૈઃ
૦૩૨૩૦૧૯૨ જુષ્ટં વિચિત્રવૈતાનૈર્મહાર્હૈર્હેમતોરણૈઃ
૦૩૨૩૦૨૦૧ હંસપારાવતવ્રાતૈસ્તત્ર તત્ર નિકૂજિતમ્
૦૩૨૩૦૨૦૨ કૃત્રિમાન્મન્યમાનૈઃ સ્વાનધિરુહ્યાધિરુહ્ય ચ

૦૩૨૩૦૨૧૧ વિહારસ્થાનવિશ્રામ સંવેશપ્રાઙ્ગણાજિરૈઃ

૦૩૨૩૦૨૧૨ યથોપજોષં રચિતૈર્વિસ્માપનમિવાત્મનઃ

૦૩૨૩૦૨૨૧ ઈદૃગ્ગૃહં તત્પશ્યન્તીં નાતિપ્રીતેન ચેતસા

૦૩૨૩૦૨૨૨ સર્વભૂતાશયાભિજ્ઞઃ પ્રાવોચત્કર્દમઃ સ્વયમ્

૦૩૨૩૦૨૩૧ નિમજ્જ્યાસ્મિન્હ્રદે ભીરુ વિમાનમિદમારુહ

૦૩૨૩૦૨૩૨ ઇદં શુક્લકૃતં તીર્થમાશિષાં યાપકં નૃણામ્

૦૩૨૩૦૨૪૧ સા તદ્ભર્તુઃ સમાદાય વચઃ કુવલયેક્ષણા

૦૩૨૩૦૨૪૨ સરજં બિભ્રતી વાસો વેણીભૂતાંશ્ચ મૂર્ધજાન્

૦૩૨૩૦૨૫૧ અઙ્ગં ચ મલપઙ્કેન સઞ્છન્નં શબલસ્તનમ્

૦૩૨૩૦૨૫૨ આવિવેશ સરસ્વત્યાઃ સરઃ શિવજલાશયમ્

૦૩૨૩૦૨૬૧ સાન્તઃ સરસિ વેશ્મસ્થાઃ શતાનિ દશ કન્યકાઃ

૦૩૨૩૦૨૬૨ સર્વાઃ કિશોરવયસો દદર્શોત્પલગન્ધયઃ

૦૩૨૩૦૨૭૧ તાં દૃષ્ટ્વા સહસોત્થાય પ્રોચુઃ પ્રાઞ્જલયઃ સ્ત્રિયઃ

૦૩૨૩૦૨૭૨ વયં કર્મકરીસ્તુભ્યં શાધિ નઃ કરવામ કિમ્

૦૩૨૩૦૨૮૧ સ્નાનેન તાં મહાર્હેણ સ્નાપયિત્વા મનસ્વિનીમ્

૦૩૨૩૦૨૮૨ દુકૂલે નિર્મલે નૂત્ને દદુરસ્યૈ ચ માનદાઃ

૦૩૨૩૦૨૯૧ ભૂષણાનિ પરાર્ધ્યાનિ વરીયાંસિ દ્યુમન્તિ ચ

૦૩૨૩૦૨૯૨ અન્નં સર્વગુણોપેતં પાનં ચૈવામૃતાસવમ્

૦૩૨૩૦૩૦૧ અથાદર્શે સ્વમાત્માનં સ્રગ્વિણં વિરજામ્બરમ્

૦૩૨૩૦૩૦૨ વિરજં કૃતસ્વસ્ત્યયનં કન્યાભિર્બહુમાનિતમ્

૦૩૨૩૦૩૧૧ સ્નાતં કૃતશિરઃસ્નાનં સર્વાભરણભૂષિતમ્

૦૩૨૩૦૩૧૨ નિષ્કગ્રીવં વલયિનં કૂજત્કાઞ્ચનનૂપુરમ્

૦૩૨૩૦૩૨૧ શ્રોણ્યોરધ્યસ્તયા કાઞ્ચ્યા કાઞ્ચન્યા બહુરત્નયા

૦૩૨૩૦૩૨૨ હારેણ ચ મહાર્હેણ રુચકેન ચ ભૂષિતમ્

૦૩૨૩૦૩૩૧ સુદતા સુભ્રુવા શ્લક્ષ્ણ સ્નિગ્ધાપાઙ્ગેન ચક્ષુષા

૦૩૨૩૦૩૩૨ પદ્મકોશસ્પૃધા નીલૈરલકૈશ્ચ લસન્મુખમ્

૦૩૨૩૦૩૪૧ યદા સસ્માર ઋષભમૃષીણાં દયિતં પતિમ્

૦૩૨૩૦૩૪૨ તત્ર ચાસ્તે સહ સ્ત્રીભિર્યત્રાસ્તે સ પ્રજાપતિઃ

૦૩૨૩૦૩૫૧ ભર્તુઃ પુરસ્તાદાત્માનં સ્ત્રીસહસ્રવૃતં તદા

૦૩૨૩૦૩૫૨ નિશામ્ય તદ્યોગગતિં સંશયં પ્રત્યપદ્યત

૦૩૨૩૦૩૬૧ સ તાં કૃતમલસ્નાનાં વિભ્રાજન્તીમપૂર્વવત્

૦૩૨૩૦૩૬૨ આત્મનો બિભ્રતીં રૂપં સંવીતરુચિરસ્તનીમ્

૦૩૨૩૦૩૭૧ વિદ્યાધરીસહસ્રેણ સેવ્યમાનાં સુવાસસમ્
૦૩૨૩૦૩૭૨ જાતભાવો વિમાનં તદારોહયદમિત્રહન્
૦૩૨૩૦૩૮૧ તસ્મિન્નલુપ્તમહિમા પ્રિયયાનુરક્તો
૦૩૨૩૦૩૮૨ વિદ્યાધરીભિરુપચીર્ણવપુર્વિમાને
૦૩૨૩૦૩૮૩ બભ્રાજ ઉત્કચકુમુદ્ગણવાનપીચ્યસ્
૦૩૨૩૦૩૮૪ તારાભિરાવૃત ઇવોડુપતિર્નભઃસ્થઃ
૦૩૨૩૦૩૯૧ તેનાષ્ટલોકપવિહારકુલાચલેન્દ્ર
૦૩૨૩૦૩૯૨ દ્રોણીષ્વનઙ્ગસખમારુતસૌભગાસુ
૦૩૨૩૦૩૯૩ સિદ્ધૈર્નુતો દ્યુધુનિપાતશિવસ્વનાસુ
૦૩૨૩૦૩૯૪ રેમે ચિરં ધનદવલ્લલનાવરૂથી
૦૩૨૩૦૪૦૧ વૈશ્રમ્ભકે સુરસને નન્દને પુષ્પભદ્રકે
૦૩૨૩૦૪૦૨ માનસે ચૈત્રરથ્યે ચ સ રેમે રામયા રતઃ
૦૩૨૩૦૪૧૧ ભ્રાજિષ્ણુના વિમાનેન કામગેન મહીયસા
૦૩૨૩૦૪૧૨ વૈમાનિકાનત્યશેત ચરલ્લોકાન્યથાનિલઃ
૦૩૨૩૦૪૨૧ કિં દુરાપાદનં તેષાં પુંસામુદ્દામચેતસામ્
૦૩૨૩૦૪૨૨ યૈરાશ્રિતસ્તીર્થપદશ્ચરણો વ્યસનાત્યયઃ
૦૩૨૩૦૪૩૧ પ્રેક્ષયિત્વા ભુવો ગોલં પત્ન્યૈ યાવાન્સ્વસંસ્થયા
૦૩૨૩૦૪૩૨ બહ્વાશ્ચર્યં મહાયોગી સ્વાશ્રમાય ન્યવર્તત
૦૩૨૩૦૪૪૧ વિભજ્ય નવધાત્માનં માનવીં સુરતોત્સુકામ્
૦૩૨૩૦૪૪૨ રામાં નિરમયન્રેમે વર્ષપૂગાન્મુહૂર્તવત્
૦૩૨૩૦૪૫૧ તસ્મિન્વિમાન ઉત્કૃષ્ટાં શય્યાં રતિકરીં શ્રિતા
૦૩૨૩૦૪૫૨ ન ચાબુધ્યત તં કાલં પત્યાપીચ્યેન સઙ્ગતા
૦૩૨૩૦૪૬૧ એવં યોગાનુભાવેન દમ્પત્યો રમમાણયોઃ
૦૩૨૩૦૪૬૨ શતં વ્યતીયુઃ શરદઃ કામલાલસયોર્મનાક્
૦૩૨૩૦૪૭૧ તસ્યામાધત્ત રેતસ્તાં ભાવયન્નાત્મનાત્મવિત્
૦૩૨૩૦૪૭૨ નોધા વિધાય રૂપં સ્વં સર્વસઙ્કલ્પવિદ્વિભુઃ
૦૩૨૩૦૪૮૧ અતઃ સા સુષુવે સદ્યો દેવહૂતિઃ સ્ત્રિયઃ પ્રજાઃ
૦૩૨૩૦૪૮૨ સર્વાસ્તાશ્ચારુસર્વાઙ્ગ્યો લોહિતોત્પલગન્ધયઃ
૦૩૨૩૦૪૯૧ પતિં સા પ્રવ્રજિષ્યન્તં તદાલક્ષ્યોશતી બહિઃ
૦૩૨૩૦૪૯૨ સ્મયમાના વિક્લવેન હૃદયેન વિદૂયતા
૦૩૨૩૦૫૦૧ લિખન્ત્યધોમુખી ભૂમિં પદા નખમણિશ્રિયા
૦૩૨૩૦૫૦૨ ઉવાચ લલિતાં વાચં નિરુધ્યાશ્રુકલાં શનૈઃ

૦૩૨૩૦૫૧૦ દેવહૂતિરુવાચ
૦૩૨૩૦૫૧૧ સર્વં તદ્ભગવાન્મહ્યમુપોવાહ પ્રતિશ્રુતમ્
૦૩૨૩૦૫૧૨ અથાપિ મે પ્રપન્નાયા અભયં દાતુમર્હસિ
૦૩૨૩૦૫૨૧ બ્રહ્મન્દુહિતૃભિસ્તુભ્યં વિમૃગ્યાઃ પતયઃ સમાઃ
૦૩૨૩૦૫૨૨ કશ્ચિત્સ્યાન્મે વિશોકાય ત્વયિ પ્રવ્રજિતે વનમ્
૦૩૨૩૦૫૩૧ એતાવતાલં કાલેન વ્યતિક્રાન્તેન મે પ્રભો
૦૩૨૩૦૫૩૨ ઇન્દ્રિયાર્થપ્રસઙ્ગેન પરિત્યક્તપરાત્મનઃ
૦૩૨૩૦૫૪૧ ઇન્દ્રિયાર્થેષુ સજ્જન્ત્યા પ્રસઙ્ગસ્ત્વયિ મે કૃતઃ
૦૩૨૩૦૫૪૨ અજાનન્ત્યા પરં ભાવં તથાપ્યસ્ત્વભયાય મે
૦૩૨૩૦૫૫૧ સઙ્ગો યઃ સંસૃતેર્હેતુરસત્સુ વિહિતોऽધિયા
૦૩૨૩૦૫૫૨ સ એવ સાધુષુ કૃતો નિઃસઙ્ગત્વાય કલ્પતે
૦૩૨૩૦૫૬૧ નેહ યત્કર્મ ધર્માય ન વિરાગાય કલ્પતે
૦૩૨૩૦૫૬૨ ન તીર્થપદસેવાયૈ જીવન્નપિ મૃતો હિ સઃ
૦૩૨૩૦૫૭૧ સાહં ભગવતો નૂનં વઞ્ચિતા માયયા દૃઢમ્
૦૩૨૩૦૫૭૨ યત્ત્વાં વિમુક્તિદં પ્રાપ્ય ન મુમુક્ષેય બન્ધનાત્

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે
પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયોપાખ્યાને
ત્રયોવિંશોऽધ્યાયઃ ॥ ૨૩ ॥

---

૦૩૨૪૦૦૧૦ મૈત્રેય ઉવાચ
૦૩૨૪૦૦૧૧ નિર્વેદવાદિનીમેવં મનોર્દુહિતરં મુનિઃ
૦૩૨૪૦૦૧૨ દયાલુઃ શાલિનીમાહ શુક્લાભિવ્યાહૃતં સ્મરન્
૦૩૨૪૦૦૨૦ ઋષિરુવાચ
૦૩૨૪૦૦૨૧ મા ખિદો રાજપુત્રીત્થમાત્માનં પ્રત્યનિન્દિતે
૦૩૨૪૦૦૨૨ ભગવાંસ્તેऽક્ષરો ગર્ભમદૂરાત્સમ્પ્રપત્સ્યતે
૦૩૨૪૦૦૩૧ ધૃતવ્રતાસિ ભદ્રં તે દમેન નિયમેન ચ
૦૩૨૪૦૦૩૨ તપોદ્રવિણદાનૈશ્ચ શ્રદ્ધયા ચેશ્વરં ભજ
૦૩૨૪૦૦૪૧ સ ત્વયારાધિતઃ શુક્લો વિતન્વન્મામકં યશઃ
૦૩૨૪૦૦૪૨ છેત્તા તે હૃદયગ્રન્થિમૌદર્યો બ્રહ્મભાવનઃ
૦૩૨૪૦૦૫૦ મૈત્રેય ઉવાચ
૦૩૨૪૦૦૫૧ દેવહૂત્યપિ સન્દેશં ગૌરવેણ પ્રજાપતેઃ

૦૩૨૪૦૦૫૨ સમ્યક્શ્રદ્ધાય પુરુષં કૂટસ્થમભજદ્ગુરુમ્
૦૩૨૪૦૦૬૧ તસ્યાં બહુતિથે કાલે ભગવાન્મધુસૂદનઃ
૦૩૨૪૦૦૬૨ કાર્દમં વીર્યમાપન્નો જજ્ઞેઽગ્નિરિવ દારુણિ
૦૩૨૪૦૦૭૧ અવાદયંસ્તદા વ્યોમ્નિ વાદિત્રાણિ ઘનાઘનાઃ
૦૩૨૪૦૦૭૨ ગાયન્તિ તં સ્મ ગન્ધર્વા નૃત્યન્ત્યપ્સરસો મુદા
૦૩૨૪૦૦૮૧ પેતુઃ સુમનસો દિવ્યાઃ ખેચરૈરપવર્જિતાઃ
૦૩૨૪૦૦૮૨ પ્રસેદુશ્ચ દિશઃ સર્વા અમ્ભાંસિ ચ મનાંસિ ચ
૦૩૨૪૦૦૯૧ તત્કર્દમાશ્રમપદં સરસ્વત્યા પરિશ્રિતમ્
૦૩૨૪૦૦૯૨ સ્વયમ્ભૂઃ સાકમૃષિભિર્મરીચ્યાદિભિરભ્યયાત્
૦૩૨૪૦૧૦૧ ભગવન્તં પરં બ્રહ્મ સત્ત્વેનાંશેન શત્રુહન્
૦૩૨૪૦૧૦૨ તત્ત્વસઙ્ખ્યાનવિજ્ઞપ્ત્યૈ જાતં વિદ્વાનજઃ સ્વરાટ્
૦૩૨૪૦૧૧૧ સભાજયન્વિશુદ્ધેન ચેતસા તચ્ચિકીર્ષિતમ્
૦૩૨૪૦૧૧૨ પ્રહૃષ્યમાણૈરસુભિઃ કર્દમં ચેદમભ્યધાત્
૦૩૨૪૦૧૨૦ બ્રહ્મોવાચ
૦૩૨૪૦૧૨૧ ત્વયા મેઽપચિતિસ્તાત કલ્પિતા નિર્વ્યલીકતઃ
૦૩૨૪૦૧૨૨ યન્મે સઞ્જગૃહે વાક્યં ભવાન્માનદ માનયન્
૦૩૨૪૦૧૩૧ એતાવત્યેવ શુશ્રૂષા કાર્યા પિતરિ પુત્રકૈઃ
૦૩૨૪૦૧૩૨ બાઢમિત્યનુમન્યેત ગૌરવેણ ગુરોર્વચઃ
૦૩૨૪૦૧૪૧ ઇમા દુહિતરઃ સત્યસ્તવ વત્સ સુમધ્યમાઃ
૦૩૨૪૦૧૪૨ સર્ગમેતં પ્રભાવૈઃ સ્વૈર્બૃંહયિષ્યન્ત્યનેકધા
૦૩૨૪૦૧૫૧ અતસ્ત્વમૃષિમુખ્યેભ્યો યથાશીલં યથારુચિ
૦૩૨૪૦૧૫૨ આત્મજાઃ પરિદેહ્યદ્ય વિસ્તૃણીહિ યશો ભુવિ
૦૩૨૪૦૧૬૧ વેદાહમાદ્યં પુરુષમવતીર્ણં સ્વમાયયા
૦૩૨૪૦૧૬૨ ભૂતાનાં શેવધિં દેહં બિભ્રાણં કપિલં મુને
૦૩૨૪૦૧૭૧ જ્ઞાનવિજ્ઞાનયોગેન કર્મણામુદ્ધરન્જટાઃ
૦૩૨૪૦૧૭૨ હિરણ્યકેશઃ પદ્માક્ષઃ પદ્મમુદ્રાપદામ્બુજઃ
૦૩૨૪૦૧૮૧ એષ માનવિ તે ગર્ભં પ્રવિષ્ટઃ કૈટભાર્દનઃ
૦૩૨૪૦૧૮૨ અવિદ્યાસંશયગ્રન્થિં છિત્ત્વા ગાં વિચરિષ્યતિ
૦૩૨૪૦૧૯૧ અયં સિદ્ધગણાધીશઃ સાઙ્ખ્યાચાર્યૈઃ સુસમ્મતઃ
૦૩૨૪૦૧૯૨ લોકે કપિલ ઇત્યાખ્યાં ગન્તા તે કીર્તિવર્ધનઃ
૦૩૨૪૦૨૦૦ મૈત્રેય ઉવાચ
૦૩૨૪૦૨૦૧ તાવાશ્વાસ્ય જગત્સ્રષ્ટા કુમારૈઃ સહનારદઃ

૦૩૨૪૦૨૦૨ હંસો હંસેન યાનેન ત્રિધામપરમં યયૌ
૦૩૨૪૦૨૧૧ ગતે શતધૃતૌ ક્ષત્તઃ કર્દમસ્તેન ચોદિતઃ
૦૩૨૪૦૨૧૨ યથોદિતં સ્વદુહિતૄઃ પ્રાદાદ્વિશ્વસૃજાં તતઃ
૦૩૨૪૦૨૨૧ મરીચયે કલાં પ્રાદાદનસૂયામથાત્રયે
૦૩૨૪૦૨૨૨ શ્રદ્ધામઙ્ગિરસેઽયચ્છત્પુલસ્ત્યાય હવિર્ભુવમ્
૦૩૨૪૦૨૩૧ પુલહાય ગતિં યુક્તાં ક્રતવે ચ ક્રિયાં સતીમ્
૦૩૨૪૦૨૩૨ ખ્યાતિં ચ ભૃગવેઽયચ્છદ્વસિષ્ઠાયાપ્યરુન્ધતીમ્
૦૩૨૪૦૨૪૧ અથર્વણેઽદદાચ્છાન્તિં યયા યજ્ઞો વિતન્યતે
૦૩૨૪૦૨૪૨ વિપ્રર્ષભાન્કૃતોદ્વાહાન્સદારાન્સમલાલયત્
૦૩૨૪૦૨૫૧ તતસ્ત ઋષયઃ ક્ષત્તઃ કૃતદારા નિમન્ત્ર્ય તમ્
૦૩૨૪૦૨૫૨ પ્રાતિષ્ઠન્નન્દિમાપન્નાઃ સ્વં સ્વમાશ્રમમણ્ડલમ્
૦૩૨૪૦૨૬૧ સ ચાવતીર્ણં ત્રિયુગમાજ્ઞાય વિબુધર્ષભમ્
૦૩૨૪૦૨૬૨ વિવિક્ત ઉપસઙ્ગમ્ય પ્રણમ્ય સમભાષત
૦૩૨૪૦૨૭૧ અહો પાપચ્યમાનાનાં નિરયે સ્વૈરમઙ્ગલૈઃ
૦૩૨૪૦૨૭૨ કાલેન ભૂયસા નૂનં પ્રસીદન્તીહ દેવતાઃ
૦૩૨૪૦૨૮૧ બહુજન્મવિપક્વેન સમ્યગ્યોગસમાધિના
૦૩૨૪૦૨૮૨ દ્રષ્ટું યતન્તે યતયઃ શૂન્યાગારેષુ યત્પદમ્
૦૩૨૪૦૨૯૧ સ એવ ભગવાનદ્ય હેલનં ન ગણય્ય નઃ
૦૩૨૪૦૨૯૨ ગૃહેષુ જાતો ગ્રામ્યાણાં યઃ સ્વાનાં પક્ષપોષણઃ
૦૩૨૪૦૩૦૧ સ્વીયં વાક્યમૃતં કર્તુમવતીર્ણોઽસિ મે ગૃહે
૦૩૨૪૦૩૦૨ ચિકીર્ષુર્ભગવાન્જ્ઞાનં ભક્તાનાં માનવર્ધનઃ
૦૩૨૪૦૩૧૧ તાન્યેવ તેઽભિરૂપાણિ રૂપાણિ ભગવંસ્તવ
૦૩૨૪૦૩૧૨ યાનિ યાનિ ચ રોચન્તે સ્વજનાનામરૂપિણઃ
૦૩૨૪૦૩૨૧ ત્વાં સૂરિભિસ્તત્ત્વબુભુત્સયાદ્ધા સદાભિવાદાર્હણપાદપીઠમ્
૦૩૨૪૦૩૨૨ ઐશ્વર્યવૈરાગ્યયશોઽવબોધ વીર્યશ્રિયા પૂર્તમહં પ્રપદ્યે
૦૩૨૪૦૩૩૧ પરં પ્રધાનં પુરુષં મહાન્તં કાલં કવિં ત્રિવૃતં લોકપાલમ્
૦૩૨૪૦૩૩૨ આત્માનુભૂત્યાનુગતપ્રપઞ્ચં સ્વચ્છન્દશક્તિં કપિલં પ્રપદ્યે
૦૩૨૪૦૩૪૧ અ સ્માભિપૃચ્છેઽદ્ય પતિં પ્રજાનાં ત્વયાવતીર્ણર્ણ ઉતાપ્તકામઃ
૦૩૨૪૦૩૪૨ પરિવ્રજત્પદવીમાસ્થિતોઽહં ચરિષ્યે ત્વાં હૃદિ યુઞ્જન્વિશોકઃ
૦૩૨૪૦૩૫૦ શ્રીભગવાનુવાચ
૦૩૨૪૦૩૫૧ મયા પ્રોક્તં હિ લોકસ્ય પ્રમાણં સત્યલૌકિકે
૦૩૨૪૦૩૫૨ અથાજનિ મયા તુભ્યં યદવોચમૃતં મુને

૦૩૨૪૦૩૬૧ એતન્મે જન્મ લોકેऽસ્મિન્મુમુક્ષૂણાં દુરાશયાત્
૦૩૨૪૦૩૬૨ પ્રસઙ્ખ્યાનાય તત્ત્વાનાં સમ્મતાયાત્મદર્શને
૦૩૨૪૦૩૭૧ એષ આત્મપથોऽવ્યક્તો નષ્ટઃ કાલેન ભૂયસા
૦૩૨૪૦૩૭૨ તં પ્રવર્તયિતું દેહમિમં વિદ્ધિ મયા ભૃતમ્
૦૩૨૪૦૩૮૧ ગચ્છ કામં મયાપૃષ્ટો મયિ સન્ન્યસ્તકર્મણા
૦૩૨૪૦૩૮૨ જિત્વા સુદુર્જયં મૃત્યુમમૃતત્વાય માં ભજ
૦૩૨૪૦૩૯૧ મામાત્માનં સ્વયંજ્યોતિઃ સર્વભૂતગુહાશયમ્
૦૩૨૪૦૩૯૨ આત્મન્યેવાત્મના વીક્ષ્ય વિશોકોऽભયમૃચ્છસિ
૦૩૨૪૦૪૦૧ માત્ર આધ્યાત્મિકીં વિદ્યાં શમનીં સર્વકર્મણામ્
૦૩૨૪૦૪૦૨ વિતરિષ્યે યયા ચાસૌ ભયં ચાતિતરિષ્યતિ
૦૩૨૪૦૪૧૦ મૈત્રેય ઉવાચ
૦૩૨૪૦૪૧૧ એવં સમુદિતસ્તેન કપિલેન પ્રજાપતિઃ
૦૩૨૪૦૪૧૨ દક્ષિણીકૃત્ય તં પ્રીતો વનમેવ જગામ હ
૦૩૨૪૦૪૨૧ વ્રતં સ આસ્થિતો મૌનમાત્મૈકશરણો મુનિઃ
૦૩૨૪૦૪૨૨ નિઃસઙ્ગો વ્યચરત્ક્ષોણીમનગ્નિરનિકેતનઃ
૦૩૨૪૦૪૩૧ મનો બ્રહ્મણિ યુઞ્જાનો યત્તત્સદસતઃ પરમ્
૦૩૨૪૦૪૩૨ ગુણાવભાસે વિગુણ એકભક્ત્યાનુભાવિતે
૦૩૨૪૦૪૪૧ નિરહઙ્કૃતિર્નિર્મમશ્ચ નિર્દ્વન્દ્વઃ સમદૃક્સ્વદૃક્
૦૩૨૪૦૪૪૨ પ્રત્યક્પ્રશાન્તધીર્ધીરઃ પ્રશાન્તોર્મિરિવોદધિઃ
૦૩૨૪૦૪૫૧ વાસુદેવે ભગવતિ સર્વજ્ઞે પ્રત્યગાત્મનિ
૦૩૨૪૦૪૫૨ પરેણ ભક્તિભાવેન લબ્ધાત્મા મુક્તબન્ધનઃ
૦૩૨૪૦૪૬૧ આત્માનં સર્વભૂતેષુ ભગવન્તમવસ્થિતમ્
૦૩૨૪૦૪૬૨ અપશ્યત્સર્વભૂતાનિ ભગવત્યપિ ચાત્મનિ
૦૩૨૪૦૪૭૧ ઇચ્છાદ્વેષવિહીનેન સર્વત્ર સમચેતસા
૦૩૨૪૦૪૭૨ ભગવદ્ભક્તિયુક્તેન પ્રાપ્તા ભાગવતી ગતિઃ

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે
પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયે
ચતુર્વિંશોऽધ્યાયઃ ॥ ૨૪ ॥

---

૦૩૨૫૦૦૧૦ શૌનક ઉવાચ
૦૩૨૫૦૦૧૧ કપિલસ્તત્ત્વસઙ્ખ્યાતા ભગવાનાત્મમાયયા

૦૩૨૫૦૦૧૨ જાતઃ સ્વયમજઃ સાક્ષાદાત્મપ્રજ્ઞપ્તયે નૃણામ્

૦૩૨૫૦૦૨૧ ન હ્યસ્ય વર્ષ્મણઃ પુંસાં વરિમ્ણઃ સર્વયોગિનામ્

૦૩૨૫૦૦૨૨ વિશ્રુતૌ શ્રુતદેવસ્ય ભૂરિ તૃપ્યન્તિ મેઽસવઃ

૦૩૨૫૦૦૩૧ યદ્યદ્વિધત્તે ભગવાન્સ્વચ્છન્દાત્માત્મમાયયા

૦૩૨૫૦૦૩૨ તાનિ મે શ્રદ્દધાનસ્ય કીર્તન્યાન્યનુકીર્તય

૦૩૨૫૦૦૪૦ સૂત ઉવાચ

૦૩૨૫૦૦૪૧ દ્વૈપાયનસખસ્ત્વેવં મૈત્રેયો ભગવાંસ્તથા

૦૩૨૫૦૦૪૨ પ્રાહેદં વિદુરં પ્રીત આન્વીક્ષિક્યાં પ્રચોદિતઃ

૦૩૨૫૦૦૫૦ મૈત્રેય ઉવાચ

૦૩૨૫૦૦૫૧ પિતરિ પ્રસ્થિતેઽરણ્યં માતુઃ પ્રિયચિકીર્ષયા

૦૩૨૫૦૦૫૨ તસ્મિન્બિન્દુસરેઽવાત્સીદ્ભગવાન્કપિલઃ કિલ

૦૩૨૫૦૦૬૧ તમાસીનમકર્માણં તત્ત્વમાર્ગાગ્રદર્શનમ્

૦૩૨૫૦૦૬૨ સ્વસુતં દેવહૂત્યાહ ધાતુઃ સંસ્મરતી વચઃ

૦૩૨૫૦૦૭૦ દેવહૂતિરુવાચ

૦૩૨૫૦૦૭૧ નિર્વિણ્ણા નિતરાં ભૂમન્નસદિન્દ્રિયતર્ષણાત્

૦૩૨૫૦૦૭૨ યેન સમ્ભાવ્યમાનેન પ્રપન્નાન્ધં તમઃ પ્રભો

૦૩૨૫૦૦૮૧ તસ્ય ત્વં તમસોઽન્ધસ્ય દુષ્પારસ્યાદ્ય પારગમ્

૦૩૨૫૦૦૮૨ સચ્ચક્ષુર્જન્મનામન્તે લબ્ધં મે ત્વદનુગ્રહાત્

૦૩૨૫૦૦૯૧ ય આદ્યો ભગવાન્પુંસામીશ્વરો વૈ ભવાન્કિલ

૦૩૨૫૦૦૯૨ લોકસ્ય તમસાન્ધસ્ય ચક્ષુઃ સૂર્ય ઇવોદિતઃ

૦૩૨૫૦૧૦૧ અથ મે દેવ સમ્મોહમપાક્રષ્ટું ત્વમર્હસિ

૦૩૨૫૦૧૦૨ યોઽવગ્રહોઽહં મમેતીત્યેતસ્મિન્યોજિતસ્ત્વયા

૦૩૨૫૦૧૧૧ તં ત્વા ગતાહં શરણં શરણ્યં સ્વભૃત્યસંસારતરોઃ કુઠારમ્

૦૩૨૫૦૧૧૨ જિજ્ઞાસયાહં પ્રકૃતેઃ પૂરુષસ્ય નમામિ સદ્ધર્મવિદાં વરિષ્ઠમ્

૦૩૨૫૦૧૨૦ મૈત્રેય ઉવાચ

૦૩૨૫૦૧૨૧ ઇતિ સ્વમાતુર્નિરવદ્યમીપ્સિતં નિશમ્ય પુંસામપવર્ગવર્ધનમ્

૦૩૨૫૦૧૨૨ ધિયાભિનન્દ્યાત્મવતાં સતાં ગતિર્બભાષ ઈષત્સ્મિતશોભિતાનનઃ

૦૩૨૫૦૧૩૦ શ્રીભગવાનુવાચ

૦૩૨૫૦૧૩૧ યોગ આધ્યાત્મિકઃ પુંસાં મતો નિઃશ્રેયસાય મે

૦૩૨૫૦૧૩૨ અત્યન્તોપરતિર્યત્ર દુઃખસ્ય ચ સુખસ્ય ચ

૦૩૨૫૦૧૪૧ તમિમં તે પ્રવક્ષ્યામિ યમવોચં પુરાનઘે

૦૩૨૫૦૧૪૨ ઋષીણાં શ્રોતુકામાનાં યોગં સર્વાઙ્ગનૈપુણમ્

૦૩૨૫૦૧૫૧ ચેતઃ ખલ્વસ્ય બન્ધાય મુક્તયે ચાત્મનો મતમ્
૦૩૨૫૦૧૫૨ ગુણેષુ સક્તં બન્ધાય રતં વા પુંસિ મુક્તયે
૦૩૨૫૦૧૬૧ અહં મમાભિમાનોત્થૈઃ કામલોભાદિભિર્મલૈઃ
૦૩૨૫૦૧૬૨ વીતં યદા મનઃ શુદ્ધમદુઃખમસુખં સમમ્
૦૩૨૫૦૧૭૧ તદા પુરુષ આત્માનં કેવલં પ્રકૃતેઃ પરમ્
૦૩૨૫૦૧૭૨ નિરન્તરં સ્વયંજ્યોતિરણિમાનમખણ્ડિતમ્
૦૩૨૫૦૧૮૧ જ્ઞાનવૈરાગ્યયુક્તેન ભક્તિયુક્તેન ચાત્મના
૦૩૨૫૦૧૮૨ પરિપશ્યત્યુદાસીનં પ્રકૃતિં ચ હતૌજસમ્
૦૩૨૫૦૧૯૧ ન યુજ્યમાનયા ભક્ત્યા ભગવત્યખિલાત્મનિ
૦૩૨૫૦૧૯૨ સદૃશોઽસ્તિ શિવઃ પન્થા યોગિનાં બ્રહ્મસિદ્ધયે
૦૩૨૫૦૨૦૧ પ્રસઙ્ગમજરં પાશમાત્મનઃ કવયો વિદુઃ
૦૩૨૫૦૨૦૨ સ એવ સાધુષુ કૃતો મોક્ષદ્વારમપાવૃતમ્
૦૩૨૫૦૨૧૧ તિતિક્ષવઃ કારુણિકાઃ સુહૃદઃ સર્વદેહિનામ્
૦૩૨૫૦૨૧૨ અજાતશત્રવઃ શાન્તાઃ સાધવઃ સાધુભૂષણાઃ
૦૩૨૫૦૨૨૧ મય્યનન્યેન ભાવેન ભક્તિં કુર્વન્તિ યે દૃઢામ્
૦૩૨૫૦૨૨૨ મત્કૃતે ત્યક્તકર્માણસ્ત્યક્તસ્વજનબાન્ધવાઃ
૦૩૨૫૦૨૩૧ મદાશ્રયાઃ કથા મૃષ્ટાઃ શ◌ૃણ્વન્તિ કથયન્તિ ચ
૦૩૨૫૦૨૩૨ તપન્તિ વિવિધાસ્તાપા નૈતાન્મદ્ગતચેતસઃ
૦૩૨૫૦૨૪૧ ત એતે સાધવઃ સાધ્વિ સર્વસઙ્ગવિવર્જિતાઃ
૦૩૨૫૦૨૪૨ સઙ્ગસ્તેષ્વથ તે પ્રાર્થ્યઃ સઙ્ગદોષહરા હિ તે
૦૩૨૫૦૨૫૧ સતાં પ્રસઙ્ગાન્મમ વીર્યસંવિદો ભવન્તિ હૃત્કર્ણરસાયનાઃ કથાઃ
૦૩૨૫૦૨૫૨ તજ્જોષણાદાશ્વપવર્ગવર્ત્મનિ શ્રદ્ધા રતિર્ભક્તિરનુક્રમિષ્યતિ
૦૩૨૫૦૨૬૧ ભક્ત્યા પુમાન્જાતવિરાગ ઐન્દ્રિયાદ્દૃષ્ટશ્રુતાન્મદ્રચનાનુચિન્તયા
૦૩૨૫૦૨૬૨ ચિત્તસ્ય યત્તો ગ્રહણે યોગયુક્તો યતિષ્યતે ઋજુભિર્યોગમાર્ગૈઃ
૦૩૨૫૦૨૭૧ અસેવયાયં પ્રકૃતેર્ગુણાનાં જ્ઞાનેન વૈરાગ્યવિજૃમ્ભિતેન
૦૩૨૫૦૨૭૨ યોગેન મય્યર્પિતયા ચ ભક્ત્યા માં પ્રત્યગાત્માનમિહાવરુન્ધે
૦૩૨૫૦૨૮૦ દેવહૂતિરુવાચ
૦૩૨૫૦૨૮૧ કાચિત્ત્વય્યુચિતા ભક્તિઃ કીદૃશી મમ ગોચરા
૦૩૨૫૦૨૮૨ યયા પદં તે નિર્વાણમઞ્જસાન્વાશ્નવા અહમ્
૦૩૨૫૦૨૯૧ યો યોગો ભગવદ્બાણો નિર્વાણાત્મંસ્ત્વયોદિતઃ
૦૩૨૫૦૨૯૨ કીદૃશઃ કતિ ચાઙ્ગાનિ યતસ્તત્ત્વાવબોધનમ્
૦૩૨૫૦૩૦૧ તદેતન્મે વિજાનીહિ યથાહં મન્દધીર્હરે

૦૩૨૫૦૩૦૨ સુખં બુદ્ધ્યેય દુર્બોધં યોષા ભવદનુગ્રહાત્
૦૩૨૫૦૩૧૦ મૈત્રેય ઉવાચ
૦૩૨૫૦૩૧૧ વિદિત્વાર્થં કપિલો માતુરિત્થં જાતસ્નેહો યત્ર તન્વાભિજાતઃ
૦૩૨૫૦૩૧૨ તત્ત્વામ્નાયં યત્પ્રવદન્તિ સાઙ્ખ્યં પ્રોવાચ વૈ ભક્તિવિતાનયોગમ્
૦૩૨૫૦૩૨૦ શ્રીભગવાનુવાચ
૦૩૨૫૦૩૨૧ દેવાનાં ગુણલિઙ્ગાનામાનુશ્રવિકકર્મણામ્
૦૩૨૫૦૩૨૨ સત્ત્વ એવૈકમનસો વૃત્તિઃ સ્વાભાવિકી તુ યા
૦૩૨૫૦૩૪૧ અનિમિત્તા ભાગવતી ભક્તિઃ સિદ્ધેર્ગરીયસી
૦૩૨૫૦૩૪૨ જરયત્યાશુ યા કોશં નિગીર્ણમનલો યથા
૦૩૨૫૦૩૫૧ નૈકાત્મતાં મે સ્પૃહયન્તિ કેચિન્મત્પાદસેવાભિરતા મદીહાઃ
૦૩૨૫૦૩૫૨ યેઽન્યોન્યતો ભાગવતાઃ પ્રસજ્ય સભાજયન્તે મમ પૌરુષાણિ
૦૩૨૫૦૩૬૧ પશ્યન્તિ તે મે રુચિરાણ્યમ્બ સન્તઃ પ્રસન્નવક્ત્રારુણલોચનાનિ
૦૩૨૫૦૩૬૨ રૂપાણિ દિવ્યાનિ વરપ્રદાનિ સાકં વાચં સ્પૃહણીયાં વદન્તિ
૦૩૨૫૦૩૭૧ તૈર્દર્શનીયાવયવૈરુદાર વિલાસહાસેક્ષિતવામસૂક્તૈઃ
૦૩૨૫૦૩૭૨ હૃતાત્મનો હૃતપ્રાણાંશ્ચ ભક્તિરનિચ્છતો મે ગતિમણ્વીં પ્રયુઙ્ક્તે
૦૩૨૫૦૩૮૧ અથો વિભૂતિં મમ માયાવિનસ્તામૈશ્વર્યમષ્ટાઙ્ગમનુપ્રવૃત્તમ્
૦૩૨૫૦૩૮૨ શ્રિયં ભાગવતીં વાસ્પૃહયન્તિ ભદ્રાં પરસ્ય મે તેઽશ્નુવતે તુ લોકે
૦૩૨૫૦૩૯૧ ન કર્હિચિન્મત્પરાઃ શાન્તરૂપે નઙ્ક્ષ્યન્તિ નો મેઽનિમિષો લેઢિ હેતિઃ
૦૩૨૫૦૩૯૨ યેષામહં પ્રિય આત્મા સુતશ્ચ સખા ગુરુઃ સુહૃદો દૈવમિષ્ટમ્
૦૩૨૫૦૪૦૧ ઇમં લોકં તથૈવામુમાત્માનમુભયાયિનમ્
૦૩૨૫૦૪૦૨ આત્માનમનુ યે ચેહ યે રાયઃ પશવો ગૃહાઃ
૦૩૨૫૦૪૧૧ વિસૃજ્ય સર્વાનન્યાંશ્ચ મામેવં વિશ્વતોમુખમ્
૦૩૨૫૦૪૧૨ ભજન્ત્યનન્યયા ભક્ત્યા તાન્મૃત્યોરતિપારયે
૦૩૨૫૦૪૨૧ નાન્યત્ર મદ્ભગવતઃ પ્રધાનપુરુષેશ્વરાત્
૦૩૨૫૦૪૨૨ આત્મનઃ સર્વભૂતાનાં ભયં તીવ્રં નિવર્તતે
૦૩૨૫૦૪૩૧ મદ્ભયાદ્વાતિ વાતોઽયં સૂર્યસ્તપતિ મદ્ભયાત્
૦૩૨૫૦૪૩૨ વર્ષતીન્દ્રો દહત્યગ્નિર્મૃત્યુશ્ચરતિ મદ્ભયાત્
૦૩૨૫૦૪૪૧ જ્ઞાનવૈરાગ્યયુક્તેન ભક્તિયોગેન યોગિનઃ
૦૩૨૫૦૪૪૨ ક્ષેમાય પાદમૂલં મે પ્રવિશન્ત્યકુતોભયમ્
૦૩૨૫૦૪૫૧ એતાવાનેવ લોકેઽસ્મિન્પુંસાં નિઃશ્રેયસોદયઃ
૦૩૨૫૦૪૫૨ તીવ્રેણ ભક્તિયોગેન મનો મય્યર્પિતં સ્થિરમ્

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે

પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયોપાખ્યાને
પઞ્ચવિંશોઽધ્યાયઃ ॥ ૨૫ ॥

---

૦૩૨૬૦૦૧૦ શ્રીભગવાનુવાચ
૦૩૨૬૦૦૧૧ અથ તે સમ્પ્રવક્ષ્યામિ તત્ત્વાનાં લક્ષણં પૃથક્
૦૩૨૬૦૦૧૨ યદ્વિદિત્વા વિમુચ્યેત પુરુષઃ પ્રાકૃતૈર્ગુણૈઃ
૦૩૨૬૦૦૨૧ જ્ઞાનં નિઃશ્રેયસાર્થાય પુરુષસ્યાત્મદર્શનમ્
૦૩૨૬૦૦૨૨ યદાહુર્વર્ણયે તત્તે હૃદયગ્રન્થિભેદનમ્
૦૩૨૬૦૦૩૧ અનાદિરાત્મા પુરુષો નિર્ગુણઃ પ્રકૃતેઃ પરઃ
૦૩૨૬૦૦૩૨ પ્રત્યગ્ધામા સ્વયંજ્યોતિર્વિશ્વં યેન સમન્વિતમ્
૦૩૨૬૦૦૪૧ સ એષ પ્રકૃતિં સૂક્ષ્માં દૈવીં ગુણમયીં વિભુઃ
૦૩૨૬૦૦૪૨ યદૃચ્છયૈવોપગતામભ્યપદ્યત લીલયા
૦૩૨૬૦૦૫૧ ગુણૈર્વિચિત્રાઃ સૃજતીં સરૂપાઃ પ્રકૃતિં પ્રજાઃ
૦૩૨૬૦૦૫૨ વિલોક્ય મુમુહે સદ્યઃ સ ઇહ જ્ઞાનગૂહયા
૦૩૨૬૦૦૬૧ એવં પરાભિધ્યાનેન કર્તૃત્વં પ્રકૃતેઃ પુમાન્
૦૩૨૬૦૦૬૨ કર્મસુ ક્રિયમાણેષુ ગુણૈરાત્મનિ મન્યતે
૦૩૨૬૦૦૭૧ તદસ્ય સંસૃતિર્બન્ધઃ પારતન્ત્ર્યં ચ તત્કૃતમ્
૦૩૨૬૦૦૭૨ ભવત્યકર્તુરીશસ્ય સાક્ષિણો નિર્વૃતાત્મનઃ
૦૩૨૬૦૦૮૧ કાર્યકારણકર્તૃત્વે કારણં પ્રકૃતિં વિદુઃ
૦૩૨૬૦૦૮૨ ભોક્તૃત્વે સુખદુઃખાનાં પુરુષં પ્રકૃતેઃ પરમ્
૦૩૨૬૦૦૯૦ દેવહૂતિરુવાચ
૦૩૨૬૦૦૯૧ પ્રકૃતેઃ પુરુષસ્યાપિ લક્ષણં પુરુષોત્તમ
૦૩૨૬૦૦૯૨ બ્રૂહિ કારણયોરસ્ય સદસચ્ચ યદાત્મકમ્
૦૩૨૬૦૧૦૦ શ્રીભગવાનુવાચ
૦૩૨૬૦૧૦૧ યત્તત્ત્રિગુણમવ્યક્તં નિત્યં સદસદાત્મકમ્
૦૩૨૬૦૧૦૨ પ્રધાનં પ્રકૃતિં પ્રાહુરવિશેષં વિશેષવત્
૦૩૨૬૦૧૧૧ પઞ્ચભિઃ પઞ્ચભિર્બ્રહ્મ ચતુર્ભિર્દશભિસ્તથા
૦૩૨૬૦૧૧૨ એતચ્ચતુર્વિંશતિકં ગણં પ્રાધાનિકં વિદુઃ
૦૩૨૬૦૧૨૧ મહાભૂતાનિ પઞ્ચૈવ ભૂરાપોઽગ્નિર્મરુન્નભઃ
૦૩૨૬૦૧૨૨ તન્માત્રાણિ ચ તાવન્તિ ગન્ધાદીનિ મતાનિ મે
૦૩૨૬૦૧૩૧ ઇન્દ્રિયાણિ દશ શ્રોત્રં ત્વગ્દૃગ્રસનનાસિકાઃ

૦૩૨૬૦૧૩૨ વાક્કરૌ ચરણૌ મેઢ્રં પાયુર્દશમ ઉચ્યતે
૦૩૨૬૦૧૪૧ મનો બુદ્ધિરહઙ્કારશ્ચિત્તમિત્યન્તરાત્મકમ્
૦૩૨૬૦૧૪૨ ચતુર્ધા લક્ષ્યતે ભેદો વૃત્ત્યા લક્ષણરૂપયા
૦૩૨૬૦૧૫૧ એતાવાનેવ સઙ્ખ્યાતો બ્રહ્મણઃ સગુણસ્ય હ
૦૩૨૬૦૧૫૨ સન્નિવેશો મયા પ્રોક્તો યઃ કાલઃ પઞ્ચવિંશકઃ
૦૩૨૬૦૧૬૧ પ્રભાવં પૌરુષં પ્રાહુઃ કાલમેકે યતો ભયમ્
૦૩૨૬૦૧૬૨ અહઙ્કારવિમૂઢસ્ય કર્તુઃ પ્રકૃતિમીયુષઃ
૦૩૨૬૦૧૭૧ પ્રકૃતેર્ગુણસામ્યસ્ય નિર્વિશેષસ્ય માનવિ
૦૩૨૬૦૧૭૨ ચેષ્ટા યતઃ સ ભગવાન્કાલ ઇત્યુપલક્ષિતઃ
૦૩૨૬૦૧૮૧ અન્તઃ પુરુષરૂપેણ કાલરૂપેણ યો બહિઃ
૦૩૨૬૦૧૮૨ સમન્વેત્યેષ સત્ત્વાનાં ભગવાનાત્મમાયયા
૦૩૨૬૦૧૯૧ દૈવાત્ક્ષુભિતધર્મિણ્યાં સ્વસ્યાં યોનૌ પરઃ પુમાન્
૦૩૨૬૦૧૯૨ આધત્ત વીર્યં સાસૂત મહત્તત્ત્વં હિરણ્મયમ્
૦૩૨૬૦૨૦૧ વિશ્વમાત્મગતં વ્યઞ્જન્કૂટસ્થો જગદઙ્કુરઃ
૦૩૨૬૦૨૦૨ સ્વતેજસાપિબત્તીવ્રમાત્મપ્રસ્વાપનં તમઃ
૦૩૨૬૦૨૧૧ યત્તત્સત્ત્વગુણં સ્વચ્છં શાન્તં ભગવતઃ પદમ્
૦૩૨૬૦૨૧૨ યદાહુર્વાસુદેવાખ્યં ચિત્તં તન્મહદાત્મકમ્
૦૩૨૬૦૨૨૧ સ્વચ્છત્વમવિકારિત્વં શાન્તત્વમિતિ ચેતસઃ
૦૩૨૬૦૨૨૨ વૃત્તિભિર્લક્ષણં પ્રોક્તં યથાપાં પ્રકૃતિઃ પરા
૦૩૨૬૦૨૩૧ મહત્તત્ત્વાદ્વિકુર્વાણાદ્ભગવદ્વીર્યસમ્ભવાત્
૦૩૨૬૦૨૩૨ ક્રિયાશક્તિરહઙ્કારસ્ત્રિવિધઃ સમપદ્યત
૦૩૨૬૦૨૪૧ વૈકારિકસ્તૈજસશ્ચ તામસશ્ચ યતો ભવઃ
૦૩૨૬૦૨૪૨ મનસશ્ચેન્દ્રિયાણાં ચ ભૂતાનાં મહતામપિ
૦૩૨૬૦૨૫૧ સહસ્રશિરસં સાક્ષાદ્યમનન્તં પ્રચક્ષતે
૦૩૨૬૦૨૫૨ સઙ્કર્ષણાખ્યં પુરુષં ભૂતેન્દ્રિયમનોમયમ્
૦૩૨૬૦૨૬૧ કર્તૃત્વં કરણત્વં ચ કાર્યત્વં ચેતિ લક્ષણમ્
૦૩૨૬૦૨૬૨ શાન્તઘોરવિમૂઢત્વમિતિ વા સ્યાદહઙ્કૃતેઃ
૦૩૨૬૦૨૭૧ વૈકારિકાદ્વિકુર્વાણાન્મનસ્તત્ત્વમજાયત
૦૩૨૬૦૨૭૨ યત્સઙ્કલ્પવિકલ્પાભ્યાં વર્તતે કામસમ્ભવઃ
૦૩૨૬૦૨૮૧ યદ્વિદુર્હ્યનિરુદ્ધાખ્યં હૃષીકાણામધીશ્વરમ્
૦૩૨૬૦૨૮૨ શારદેન્દીવરશ્યામં સંરાધ્યં યોગિભિઃ શનૈઃ
૦૩૨૬૦૨૯૧ તૈજસાત્તુ વિકુર્વાણાદ્બુદ્ધિતત્ત્વમભૂત્સતિ

૦૩૨૬૦૨૯૨ દ્રવ્યસ્ફુરણવિજ્ઞાનમિન્દ્રિયાણામનુગ્રહઃ
૦૩૨૬૦૩૦૧ સંશયોઽથ વિપર્યાસો નિશ્ચયઃ સ્મૃતિરેવ ચ
૦૩૨૬૦૩૦૨ સ્વાપ ઇત્યુચ્યતે બુદ્ધેર્લક્ષણં વૃત્તિતઃ પૃથક્
૦૩૨૬૦૩૧૧ તૈજસાનીન્દ્રિયાણ્યેવ ક્રિયાજ્ઞાનવિભાગશઃ
૦૩૨૬૦૩૧૨ પ્રાણસ્ય હિ ક્રિયાશક્તિર્બુદ્ધેર્વિજ્ઞાનશક્તિતા
૦૩૨૬૦૩૨૧ તામસાચ્ચ વિકુર્વાણાદ્ભગવદ્વીર્યચોદિતાત્
૦૩૨૬૦૩૨૨ શબ્દમાત્રમભૂત્તસ્માન્નભઃ શ્રોત્રં તુ શબ્દગમ્
૦૩૨૬૦૩૩૧ અર્થાશ્રયત્વં શબ્દસ્ય દ્રષ્ટુર્લિઙ્ગત્વમેવ ચ
૦૩૨૬૦૩૩૨ તન્માત્રત્વં ચ નભસો લક્ષણં કવયો વિદુઃ
૦૩૨૬૦૩૪૧ ભૂતાનાં છિદ્રદાતૃત્વં બહિરન્તરમેવ ચ
૦૩૨૬૦૩૪૨ પ્રાણેન્દ્રિયાત્મધિષ્ણ્યત્વં નભસો વૃત્તિલક્ષણમ્
૦૩૨૬૦૩૫૧ નભસઃ શબ્દતન્માત્રાત્કાલગત્યા વિકુર્વતઃ
૦૩૨૬૦૩૫૨ સ્પર્શોઽભવત્તતો વાયુસ્ત્વક્સ્પર્શસ્ય ચ સઙ્ગ્રહઃ
૦૩૨૬૦૩૬૧ મૃદુત્વં કઠિનત્વં ચ શૈત્યમુષ્ણત્વમેવ ચ
૦૩૨૬૦૩૬૨ એતત્સ્પર્શસ્ય સ્પર્શત્વં તન્માત્રત્વં નભસ્વતઃ
૦૩૨૬૦૩૭૧ ચાલનં વ્યૂહનં પ્રાપ્તિર્નેતૃત્વં દ્રવ્યશબ્દયોઃ
૦૩૨૬૦૩૭૨ સર્વેન્દ્રિયાણામાત્મત્વં વાયોઃ કર્માભિલક્ષણમ્
૦૩૨૬૦૩૮૧ વાયોશ્ચ સ્પર્શતન્માત્રાદ્રૂપં દૈવેરિતાદભૂત્
૦૩૨૬૦૩૮૨ સમુત્થિતં તતસ્તેજશ્ચક્ષૂ રૂપોપલમ્ભનમ્
૦૩૨૬૦૩૯૧ દ્રવ્યાકૃતિત્વં ગુણતા વ્યક્તિસંસ્થાત્વમેવ ચ
૦૩૨૬૦૩૯૨ તેજસ્ત્વં તેજસઃ સાધ્વિ રૂપમાત્રસ્ય વૃત્તયઃ
૦૩૨૬૦૪૦૧ દ્યોતનં પચનં પાનમદનં હિમમર્દનમ્
૦૩૨૬૦૪૦૨ તેજસો વૃત્તયસ્ત્વેતાઃ શોષણં ક્ષુત્તૃડેવ ચ
૦૩૨૬૦૪૧૧ રૂપમાત્રાદ્વિકુર્વાણાત્તેજસો દૈવચોદિતાત્
૦૩૨૬૦૪૧૨ રસમાત્રમભૂત્તસ્માદમ્ભો જિહ્વા રસગ્રહઃ
૦૩૨૬૦૪૨૧ કષાયો મધુરસ્તિક્તઃ કટ્વમ્લ ઇતિ નૈકધા
૦૩૨૬૦૪૨૨ ભૌતિકાનાં વિકારેણ રસ એકો વિભિદ્યતે
૦૩૨૬૦૪૩૧ ક્લેદનં પિણ્ડનં તૃપ્તિઃ પ્રાણનાપ્યાયનોન્દનમ્
૦૩૨૬૦૪૩૨ તાપાપનોદો ભૂયસ્ત્વમમ્ભસો વૃત્તયસ્ત્વિમાઃ
૦૩૨૬૦૪૪૧ રસમાત્રાદ્વિકુર્વાણાદમ્ભસો દૈવચોદિતાત્
૦૩૨૬૦૪૪૨ ગન્ધમાત્રમભૂત્તસ્માત્પૃથ્વી ઘ્રાણસ્તુ ગન્ધગઃ
૦૩૨૬૦૪૫૧ કરમ્ભપૂતિસૌરભ્ય શાન્તોગ્રામ્લાદિભિઃ પૃથક્

૦૩૨૬૦૪૫૨ દ્રવ્યાવયવવૈષમ્યાદ્ગન્ધ એકો વિભિદ્યતે
૦૩૨૬૦૪૬૧ ભાવનં બ્રહ્મણઃ સ્થાનં ધારણં સદ્વિશેષણમ્
૦૩૨૬૦૪૬૨ સર્વસત્ત્વગુણોદ્ભેદઃ પૃથિવીવૃત્તિલક્ષણમ્
૦૩૨૬૦૪૭૧ નભોગુણવિશેષોઽર્થો યસ્ય તચ્છ્રોત્રમુચ્યતે
૦૩૨૬૦૪૭૨ વાયોર્ગુણવિશેષોઽર્થો યસ્ય તત્સ્પર્શનં વિદુઃ
૦૩૨૬૦૪૮૧ તેજોગુણવિશેષોઽર્થો યસ્ય તચ્ચક્ષુરુચ્યતે
૦૩૨૬૦૪૮૨ અમ્ભોગુણવિશેષોઽર્થો યસ્ય તદ્રસનં વિદુઃ
૦૩૨૬૦૪૮૩ ભૂમેર્ગુણવિશેષોઽર્થો યસ્ય સ ઘ્રાણ ઉચ્યતે
૦૩૨૬૦૪૯૧ પરસ્ય દૃશ્યતે ધર્મો હ્યપરસ્મિન્સમન્વયાત્
૦૩૨૬૦૪૯૨ અતો વિશેષો ભાવાનાં ભૂમાવેવોપલક્ષ્યતે
૦૩૨૬૦૫૦૧ એતાન્યસંહત્ય યદા મહદાદીનિ સપ્ત વૈ
૦૩૨૬૦૫૦૨ કાલકર્મગુણોપેતો જગદાદિરુપાવિશત્
૦૩૨૬૦૫૧૧ તતસ્તેનાનુવિદ્ધેભ્યો યુક્તેભ્યોઽણ્ડમચેતનમ્
૦૩૨૬૦૫૧૨ ઉત્થિતં પુરુષો યસ્માદુદતિષ્ઠદસૌ વિરાટ્
૦૩૨૬૦૫૨૧ એતદણ્ડં વિશેષાખ્યં ક્રમવૃદ્ધૈર્દશોત્તરૈઃ
૦૩૨૬૦૫૨૨ તોયાદિભિઃ પરિવૃતં પ્રધાનેનાવૃતૈર્બહિઃ
૦૩૨૬૦૫૨૩ યત્ર લોકવિતાનોઽયં રૂપં ભગવતો હરેઃ
૦૩૨૬૦૫૩૧ હિરણ્મયાદણ્ડકોશાદુત્થાય સલિલે શયાત્
૦૩૨૬૦૫૩૨ તમાવિશ્ય મહાદેવો બહુધા નિર્બિભેદ ખમ્
૦૩૨૬૦૫૪૧ નિરભિદ્યતાસ્ય પ્રથમં મુખં વાણી તતોઽભવત્
૦૩૨૬૦૫૪૨ વાણ્યા વહ્નિરથો નાસે પ્રાણોતો ઘ્રાણ એતયોઃ
૦૩૨૬૦૫૫૧ ઘ્રાણાદ્વાયુરભિદ્યેતામક્ષિણી ચક્ષુરેતયોઃ
૦૩૨૬૦૫૫૨ તસ્માત્સૂર્યો ન્યભિદ્યેતાં કર્ણૌ શ્રોત્રં તતો દિશઃ
૦૩૨૬૦૫૬૧ નિર્બિભેદ વિરાજસ્ત્વગ્ રોમશ્મશ્ર્વાદયસ્તતઃ
૦૩૨૬૦૫૬૨ તત ઓષધયશ્ચાસન્શિશ્નં નિર્બિભિદે તતઃ
૦૩૨૬૦૫૭૧ રેતસ્તસ્માદાપ આસન્નિરભિદ્યત વૈ ગુદમ્
૦૩૨૬૦૫૭૨ ગુદાદપાનોઽપાનાચ્ચ મૃત્યુર્લોકભયઙ્કરઃ
૦૩૨૬૦૫૮૧ હસ્તૌ ચ નિરભિદ્યેતાં બલં તાભ્યાં તતઃ સ્વરાટ્
૦૩૨૬૦૫૮૨ પાદૌ ચ નિરભિદ્યેતાં ગતિસ્તાભ્યાં તતો હરિઃ
૦૩૨૬૦૫૯૧ નાડ્યોઽસ્ય નિરભિદ્યન્ત તાભ્યો લોહિતમાભૃતમ્
૦૩૨૬૦૫૯૨ નદ્યસ્તતઃ સમભવન્નુદરં નિરભિદ્યત
૦૩૨૬૦૬૦૧ ક્ષુત્પિપાસે તતઃ સ્યાતાં સમુદ્રસ્ત્વેતયોરભૂત્

૦૩૨૬૦૬૦૨ અથાસ્ય હૃદયં ભિન્નં હૃદયાન્મન ઉત્થિતમ્
૦૩૨૬૦૬૧૧ મનસશ્ચન્દ્રમા જાતો બુદ્ધિર્બુદ્ધેર્ગિરાં પતિઃ
૦૩૨૬૦૬૧૨ અહઙ્કારસ્તતો રુદ્રશ્ચિત્તં ચૈત્યસ્તતોઽભવત્
૦૩૨૬૦૬૨૧ એતે હ્યભ્યુત્થિતા દેવા નૈવાસ્યોત્થાપનેઽશકન્
૦૩૨૬૦૬૨૨ પુનરાવિવિશુઃ ખાનિ તમુત્થાપયિતું ક્રમાત્
૦૩૨૬૦૬૩૧ વહ્નિર્વાચા મુખં ભેજે નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૩૨ ઘ્રાણેન નાસિકે વાયુર્નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૪૧ અક્ષિણી ચક્ષુષાદિત્યો નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૪૨ શ્રોત્રેણ કર્ણૌ ચ દિશો નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૫૧ ત્વચં રોમભિરોષધ્યો નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૫૨ રેતસા શિશ્નમાપસ્તુ નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૬૧ ગુદં મૃત્યુરપાનેન નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૬૨ હસ્તાવિન્દ્રો બલેનૈવ નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૭૧ વિષ્ણુર્ગત્યૈવ ચરણૌ નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૭૨ નાડીર્નદ્યો લોહિતેન નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૮૧ ક્ષુત્તૃડ્ભ્યામુદરં સિન્ધુર્નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૮૨ હૃદયં મનસા ચન્દ્રો નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૯૧ બુદ્ધ્યા બ્રહ્માપિ હૃદયં નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૬૯૨ રુદ્રોઽભિમત્યા હૃદયં નોદતિષ્ઠત્તદા વિરાટ્
૦૩૨૬૦૭૦૧ ચિત્તેન હૃદયં ચૈત્યઃ ક્ષેત્રજ્ઞઃ પ્રાવિશદ્યદા
૦૩૨૬૦૭૦૨ વિરાટ્તદૈવ પુરુષઃ સલિલાદુદતિષ્ઠત
૦૩૨૬૦૭૧૧ યથા પ્રસુપ્તં પુરુષં પ્રાણેન્દ્રિયમનોધિયઃ
૦૩૨૬૦૭૧૨ પ્રભવન્તિ વિના યેન નોત્થાપયિતુમોજસા
૦૩૨૬૦૭૨૧ તમસ્મિન્પ્રત્યગાત્માનં ધિયા યોગપ્રવૃત્તયા
૦૩૨૬૦૭૨૨ ભક્ત્યા વિરક્ત્યા જ્ઞાનેન વિવિચ્યાત્મનિ ચિન્તયેત્

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે
પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયે તત્ત્વસમામ્નાયે
ષડ્વિંશોઽધ્યાયઃ ॥ ૨૬ ॥

---

૦૩૨૭૦૦૧૦ શ્રીભગવાનુવાચ
૦૩૨૭૦૦૧૧ પ્રકૃતિસ્થોઽપિ પુરુષો નાજ્યતે પ્રાકૃતૈર્ગુણૈઃ

૦૩૨૭૦૦૧૨ અવિકારાદકર્તૃત્વાન્નિર્ગુણત્વાજ્જલાર્કવત્
૦૩૨૭૦૦૨૧ સ એષ યર્હિ પ્રકૃતેર્ગુણેષ્વભિવિષજ્જતે
૦૩૨૭૦૦૨૨ અહઙ્ક્રિયાવિમૂઢાત્મા કર્તાસ્મીત્યભિમન્યતે
૦૩૨૭૦૦૩૧ તેન સંસારપદવીમવશોઽભ્યેત્યનિર્વૃતઃ
૦૩૨૭૦૦૩૨ પ્રાસઙ્ગિકૈઃ કર્મદોષૈઃ સદસન્મિશ્રયોનિષુ
૦૩૨૭૦૦૪૧ અર્થે હ્યવિદ્યમાનેઽપિ સંસૃતિર્ન નિવર્તતે
૦૩૨૭૦૦૪૨ ધ્યાયતો વિષયાનસ્ય સ્વપ્નેઽનર્થાગમો યથા
૦૩૨૭૦૦૫૧ અત એવ શનૈશ્ચિત્તં પ્રસક્તમસતાં પથિ
૦૩૨૭૦૦૫૨ ભક્તિયોગેન તીવ્રેણ વિરક્ત્યા ચ નયેદ્વશમ્
૦૩૨૭૦૦૬૧ યમાદિભિર્યોગપથૈરભ્યસઞ્શ્રદ્ધયાન્વિતઃ
૦૩૨૭૦૦૬૨ મયિ ભાવેન સત્યેન મત્કથાશ્રવણેન ચ
૦૩૨૭૦૦૭૧ સર્વભૂતસમત્વેન નિર્વૈરેણાપ્રસઙ્ગતઃ
૦૩૨૭૦૦૭૨ બ્રહ્મચર્યેણ મૌનેન સ્વધર્મેણ બલીયસા
૦૩૨૭૦૦૮૧ યદૃચ્છયોપલબ્ધેન સન્તુષ્ટો મિતભુઞ્મુનિઃ
૦૩૨૭૦૦૮૨ વિવિક્તશરણઃ શાન્તો મૈત્રઃ કરુણ આત્મવાન્
૦૩૨૭૦૦૯૧ સાનુબન્ધે ચ દેહેઽસ્મિન્નકુર્વન્નસદાગ્રહમ્
૦૩૨૭૦૦૯૨ જ્ઞાનેન દૃષ્ટતત્ત્વેન પ્રકૃતેઃ પુરુષસ્ય ચ
૦૩૨૭૦૧૦૧ નિવૃત્તબુદ્ધ્યવસ્થાનો દૂરીભૂતાન્યદર્શનઃ
૦૩૨૭૦૧૦૨ ઉપલભ્યાત્મનાત્માનં ચક્ષુષેવાર્કમાત્મદૃક્
૦૩૨૭૦૧૧૧ મુક્તલિઙ્ગં સદાભાસમસતિ પ્રતિપદ્યતે
૦૩૨૭૦૧૧૨ સતો બન્ધુમસચ્ચક્ષુઃ સર્વાનુસ્યૂતમદ્વયમ્
૦૩૨૭૦૧૨૧ યથા જલસ્થ આભાસઃ સ્થલસ્થેનાવદૃશ્યતે
૦૩૨૭૦૧૨૨ સ્વાભાસેન તથા સૂર્યો જલસ્થેન દિવિ સ્થિતઃ
૦૩૨૭૦૧૩૧ એવં ત્રિવૃદહઙ્કારો ભૂતેન્દ્રિયમનોમયૈઃ
૦૩૨૭૦૧૩૨ સ્વાભાસૈર્લક્ષિતોઽનેન સદાભાસેન સત્યદૃક્
૦૩૨૭૦૧૪૧ ભૂતસૂક્ષ્મેન્દ્રિયમનો બુદ્ધ્યાદિષ્વિહ નિદ્રયા
૦૩૨૭૦૧૪૨ લીનેષ્વસતિ યસ્તત્ર વિનિદ્રો નિરહઙ્ક્રિયઃ
૦૩૨૭૦૧૫૧ મન્યમાનસ્તદાત્માનમનષ્ટો નષ્ટવન્મૃષા
૦૩૨૭૦૧૫૨ નષ્ટેઽહઙ્કરણે દ્રષ્ટા નષ્ટવિત્ત ઇવાતુરઃ
૦૩૨૭૦૧૬૧ એવં પ્રત્યવમૃશ્યાસાવાત્માનં પ્રતિપદ્યતે
૦૩૨૭૦૧૬૨ સાહઙ્કારસ્ય દ્રવ્યસ્ય યોઽવસ્થાનમનુગ્રહઃ
૦૩૨૭૦૧૭૦ દેવહૂતિરુવાચ

૦૩૨૭૦૧૭૧ પુરુષં પ્રકૃતિર્બ્રહ્મન્ન વિમુઞ્ચતિ કર્હિચિત્
૦૩૨૭૦૧૭૨ અન્યોન્યાપાશ્રયત્વાચ્ચ નિત્યત્વાદનયોઃ પ્રભો
૦૩૨૭૦૧૮૧ યથા ગન્ધસ્ય ભૂમેશ્ચ ન ભાવો વ્યતિરેકતઃ
૦૩૨૭૦૧૮૨ અપાં રસસ્ય ચ યથા તથા બુદ્ધેઃ પરસ્ય ચ
૦૩૨૭૦૧૯૧ અકર્તુઃ કર્મબન્ધોઽયં પુરુષસ્ય યદાશ્રયઃ
૦૩૨૭૦૧૯૨ ગુણેષુ સત્સુ પ્રકૃતેઃ કૈવલ્યં તેષ્વતઃ કથમ્
૦૩૨૭૦૨૦૧ ક્વચિત્તત્ત્વાવમર્શેન નિવૃત્તં ભયમુલ્બણમ્
૦૩૨૭૦૨૦૨ અનિવૃત્તનિમિત્તત્વાત્પુનઃ પ્રત્યવતિષ્ઠતે
૦૩૨૭૦૨૧૦ શ્રીભગવાનુવાચ
૦૩૨૭૦૨૧૧ અનિમિત્તનિમિત્તેન સ્વધર્મેણામલાત્મના
૦૩૨૭૦૨૧૨ તીવ્રયા મયિ ભક્ત્યા ચ શ્રુતસમ્ભૃતયા ચિરમ્
૦૩૨૭૦૨૨૧ જ્ઞાનેન દૃષ્ટતત્ત્વેન વૈરાગ્યેણ બલીયસા
૦૩૨૭૦૨૨૨ તપોયુક્તેન યોગેન તીવ્રેણાત્મસમાધિના
૦૩૨૭૦૨૩૧ પ્રકૃતિઃ પુરુષસ્યેહ દહ્યમાના ત્વહર્નિશમ્
૦૩૨૭૦૨૩૨ તિરોભવિત્રી શનકૈરગ્નેર્યોનિરિવારણિઃ
૦૩૨૭૦૨૪૧ ભુક્તભોગા પરિત્યક્તા દૃષ્ટદોષા ચ નિત્યશઃ
૦૩૨૭૦૨૪૨ નેશ્વરસ્યાશુભં ધત્તે સ્વે મહિમ્નિ સ્થિતસ્ય ચ
૦૩૨૭૦૨૫૧ યથા હ્યપ્રતિબુદ્ધસ્ય પ્રસ્વાપો બહ્વનર્થભૃત્
૦૩૨૭૦૨૫૨ સ એવ પ્રતિબુદ્ધસ્ય ન વૈ મોહાય કલ્પતે
૦૩૨૭૦૨૬૧ એવં વિદિતતત્ત્વસ્ય પ્રકૃતિર્મયિ માનસમ્
૦૩૨૭૦૨૬૨ યુઞ્જતો નાપકુરુત આત્મારામસ્ય કર્હિચિત્
૦૩૨૭૦૨૭૧ યદૈવમધ્યાત્મરતઃ કાલેન બહુજન્મના
૦૩૨૭૦૨૭૨ સર્વત્ર જાતવૈરાગ્ય આબ્રહ્મભુવનાન્મુનિઃ
૦૩૨૭૦૨૮૧ મદ્ભક્તઃ પ્રતિબુદ્ધાર્થો મત્પ્રસાદેન ભૂયસા
૦૩૨૭૦૨૮૨ નિઃશ્રેયસં સ્વસંસ્થાનં કૈવલ્યાખ્યં મદાશ્રયમ્
૦૩૨૭૦૨૯૧ પ્રાપ્નોતીહાઞ્જસા ધીરઃ સ્વદૃશા ચ્છિન્નસંશયઃ
૦૩૨૭૦૨૯૨ યદ્ગત્વા ન નિવર્તેત યોગી લિઙ્ગાદ્વિનિર્ગમે
૦૩૨૭૦૩૦૧ યદા ન યોગોપચિતાસુ ચેતો માયાસુ સિદ્ધસ્ય વિષજ્જતેઽઙ્ગ
૦૩૨૭૦૩૦૨ અનન્યહેતુષ્વથ મે ગતિઃ સ્યાદાત્યન્તિકી યત્ર ન મૃત્યુહાસઃ

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે
પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયોપાખ્યાને
સપ્તવિંશોઽધ્યાયઃ ॥ ૨૭ ॥

૦૩૨૮૦૦૧૦ શ્રીભગવાનુવાચ
૦૩૨૮૦૦૧૧ યોગસ્ય લક્ષણં વક્ષ્યે સબીજસ્ય નૃપાત્મજે
૦૩૨૮૦૦૧૨ મનો યેનૈવ વિધિના પ્રસન્નં યાતિ સત્પથમ્
૦૩૨૮૦૦૨૧ સ્વધર્માચરણં શક્ત્યા વિધર્માચ્ચ નિવર્તનમ્
૦૩૨૮૦૦૨૨ દૈવાલ્લબ્ધેન સન્તોષ આત્મવિચ્ચરણાર્ચનમ્
૦૩૨૮૦૦૩૧ ગ્રામ્યધર્મનિવૃત્તિશ્ચ મોક્ષધર્મરતિસ્તથા
૦૩૨૮૦૦૩૨ મિતમેધ્યાદનં શશ્વદ્વિવિક્તક્ષેમસેવનમ્
૦૩૨૮૦૦૪૧ અહિંસા સત્યમસ્તેયં યાવદર્થપરિગ્રહઃ
૦૩૨૮૦૦૪૨ બ્રહ્મચર્યં તપઃ શૌચં સ્વાધ્યાયઃ પુરુષાર્ચનમ્
૦૩૨૮૦૦૫૧ મૌનં સદાસનજયઃ સ્થૈર્યં પ્રાણજયઃ શનૈઃ
૦૩૨૮૦૦૫૨ પ્રત્યાહારશ્ચેન્દ્રિયાણાં વિષયાન્મનસા હૃદિ
૦૩૨૮૦૦૬૧ સ્વધિષ્ણ્યાનામેકદેશે મનસા પ્રાણધારણમ્
૦૩૨૮૦૦૬૨ વૈકુણ્ઠલીલાભિધ્યાનં સમાધાનં તથાત્મનઃ
૦૩૨૮૦૦૭૧ એતૈરન્યૈશ્ચ પથિભિર્મનો દુષ્ટમસત્પથમ્
૦૩૨૮૦૦૭૨ બુદ્ધ્યા યુઞ્જીત શનકૈર્જિતપ્રાણો હ્યતન્દ્રિતઃ
૦૩૨૮૦૦૮૧ શુચૌ દેશે પ્રતિષ્ઠાપ્ય વિજિતાસન આસનમ્
૦૩૨૮૦૦૮૨ તસ્મિન્સ્વસ્તિ સમાસીન ઋજુકાયઃ સમભ્યસેત્
૦૩૨૮૦૦૯૧ પ્રાણસ્ય શોધયેન્માર્ગં પૂરકુમ્ભકરેચકૈઃ
૦૩૨૮૦૦૯૨ પ્રતિકૂલેન વા ચિત્તં યથા સ્થિરમચઞ્ચલમ્
૦૩૨૮૦૧૦૧ મનોઽચિરાત્સ્યાદ્વિરજં જિતશ્વાસસ્ય યોગિનઃ
૦૩૨૮૦૧૦૨ વાય્વગ્નિભ્યાં યથા લોહં ધ્માતં ત્યજતિ વૈ મલમ્
૦૩૨૮૦૧૧૧ પ્રાણાયામૈર્દહેદ્દોષાન્ધારણાભિશ્ચ કિલ્બિષાન્
૦૩૨૮૦૧૧૨ પ્રત્યાહારેણ સંસર્ગાન્ધ્યાનેનાનીશ્વરાન્ગુણાન્
૦૩૨૮૦૧૨૧ યદા મનઃ સ્વં વિરજં યોગેન સુસમાહિતમ્
૦૩૨૮૦૧૨૨ કાષ્ઠાં ભગવતો ધ્યાયેત્સ્વનાસાગ્રાવલોકનઃ
૦૩૨૮૦૧૩૧ પ્રસન્નવદનામ્ભોજં પદ્મગર્ભારુણેક્ષણમ્
૦૩૨૮૦૧૩૨ નીલોત્પલદલશ્યામં શઙ્ખચક્રગદાધરમ્
૦૩૨૮૦૧૪૧ લસત્પઙ્કજકિઞ્જલ્ક પીતકૌશેયવાસસમ્
૦૩૨૮૦૧૪૨ શ્રીવત્સવક્ષસં ભ્રાજત્કૌસ્તુભામુક્તકન્ધરમ્
૦૩૨૮૦૧૫૧ મત્તદ્વિરેફકલયા પરીતં વનમાલયા

૦૩૨૮૦૧૫૨ પરાર્ધ્યહારવલય કિરીટાઙ્ગદનૂપુરમ્
૦૩૨૮૦૧૬૧ કાઞ્ચીગુણોલ્લસચ્છ્રોણિં હૃદયામ્ભોજવિષ્ટરમ્
૦૩૨૮૦૧૬૨ દર્શનીયતમં શાન્તં મનોનયનવર્ધનમ્
૦૩૨૮૦૧૭૧ અપીચ્યદર્શનં શશ્વત્સર્વલોકનમસ્કૃતમ્
૦૩૨૮૦૧૭૨ સન્તં વયસિ કૈશોરે ભૃત્યાનુગ્રહકાતરમ્
૦૩૨૮૦૧૮૧ કીર્તન્યતીર્થયશસં પુણ્યશ્લોકયશસ્કરમ્
૦૩૨૮૦૧૮૨ ધ્યાયેદ્દેવં સમગ્રાઙ્ગં યાવન્ન ચ્યવતે મનઃ
૦૩૨૮૦૧૯૧ સ્થિતં વ્રજન્તમાસીનં શયાનં વા ગુહાશયમ્
૦૩૨૮૦૧૯૨ પ્રેક્ષણીયેહિતં ધ્યાયેચ્છુદ્ધભાવેન ચેતસા
૦૩૨૮૦૨૦૧ તસ્મિન્લબ્ધપદં ચિત્તં સર્વાવયવસંસ્થિતમ્
૦૩૨૮૦૨૦૨ વિલક્ષ્યૈકત્ર સંયુજ્યાદઙ્ગે ભગવતો મુનિઃ
૦૩૨૮૦૨૧૧ સઞ્ચિન્તયેદ્ભગવતશ્ચરણારવિન્દં
૦૩૨૮૦૨૧૨ વજ્રાઙ્કુશધ્વજસરોરુહલાઞ્છનાઢ્યમ્
૦૩૨૮૦૨૧૩ ઉત્તુઙ્ગરક્તવિલસન્નખચક્રવાલ
૦૩૨૮૦૨૧૪ જ્યોત્સ્નાભિરાહતમહદ્ધૃદયાન્ધકારમ્
૦૩૨૮૦૨૨૧ યચ્છૌચનિઃસૃતસરિત્પ્રવરોદકેન
૦૩૨૮૦૨૨૨ તીર્થેન મૂર્ધ્ન્યધિકૃતેન શિવઃ શિવોઽભૂત્
૦૩૨૮૦૨૨૩ ધ્યાતુર્મનઃશમલશૈલનિસૃષ્ટવજ્રં
૦૩૨૮૦૨૨૪ ધ્યાયેચ્ચિરં ભગવતશ્ચરણારવિન્દમ્
૦૩૨૮૦૨૩૧ જાનુદ્વયં જલજલોચનયા જનન્યા
૦૩૨૮૦૨૩૨ લક્ષ્મ્યાખિલસ્ય સુરવન્દિતયા વિધાતુઃ
૦૩૨૮૦૨૩૩ ઊર્વોર્નિધાય કરપલ્લવરોચિષા યત્
૦૩૨૮૦૨૩૪ સંલાલિતં હૃદિ વિભોરભવસ્ય કુર્યાત્
૦૩૨૮૦૨૪૧ ઊરૂ સુપર્ણભુજયોરધિ શોભમાનાવ્
૦૩૨૮૦૨૪૨ ઓજોનિધી અતસિકાકુસુમાવભાસૌ
૦૩૨૮૦૨૪૩ વ્યાલમ્બિપીતવરવાસસિ વર્તમાન
૦૩૨૮૦૨૪૪ કાઞ્ચીકલાપપરિરમ્ભિ નિતમ્બબિમ્બમ્
૦૩૨૮૦૨૫૧ નાભિહ્રદં ભુવનકોશગુહોદરસ્થં
૦૩૨૮૦૨૫૨ યત્રાત્મયોનિધિષણાખિલલોકપદ્મમ્
૦૩૨૮૦૨૫૩ વ્યૂઢં હરિન્મણિવૃષસ્તનયોરમુષ્ય
૦૩૨૮૦૨૫૪ ધ્યાયેદ્દ્વયં વિશદહારમયૂખગૌરમ્
૦૩૨૮૦૨૬૧ વક્ષોઽધિવાસમૃષભસ્ય મહાવિભૂતેઃ

૦૩૨૮૦૨૬૨ પુંસાં મનોનયનનિર્વૃતિમાદધાનમ્
૦૩૨૮૦૨૬૩ કણ્ઠં ચ કૌસ્તુભમણેરધિભૂષણાર્થં
૦૩૨૮૦૨૬૪ કુર્યાન્મનસ્યખિલલોકનમસ્કૃતસ્ય
૦૩૨૮૦૨૭૧ બાહૂંશ્ચ મન્દરગિરેઃ પરિવર્તનેન
૦૩૨૮૦૨૭૨ નિર્ણિક્તબાહુવલયાનધિલોકપાલાન્
૦૩૨૮૦૨૭૩ સઞ્ચિન્તયેદ્દશશતારમસહ્યતેજઃ
૦૩૨૮૦૨૭૪ શઙ્ખં ચ તત્કરસરોરુહરાજહંસમ્
૦૩૨૮૦૨૮૧ કૌમોદકીં ભગવતો દયિતાં સ્મરેત
૦૩૨૮૦૨૮૨ દિગ્ધામરાતિભટશોણિતકર્દમેન
૦૩૨૮૦૨૮૩ માલાં મધુવ્રતવરૂથગિરોપઘુષ્ટાં
૦૩૨૮૦૨૮૪ ચૈત્યસ્ય તત્ત્વમમલં મણિમસ્ય કણ્ઠે
૦૩૨૮૦૨૯૧ ભૃત્યાનુકમ્પિતધિયેહ ગૃહીતમૂર્તેઃ
૦૩૨૮૦૨૯૨ સઞ્ચિન્તયેદ્ભગવતો વદનારવિન્દમ્
૦૩૨૮૦૨૯૩ યદ્વિસ્ફુરન્મકરકુણ્ડલવલ્ગિતેન
૦૩૨૮૦૨૯૪ વિદ્યોતિતામલકપોલમુદારનાસમ્
૦૩૨૮૦૩૦૧ યચ્છ્રીનિકેતમલિભિઃ પરિસેવ્યમાનં
૦૩૨૮૦૩૦૨ ભૂત્યા સ્વયા કુટિલકુન્તલવૃન્દજુષ્ટમ્
૦૩૨૮૦૩૦૩ મીનદ્વયાશ્રયમધિક્ષિપદબ્જનેત્રં
૦૩૨૮૦૩૦૪ ધ્યાયેન્મનોમયમતન્દ્રિત ઉલ્લસદ્ભ્રુ
૦૩૨૮૦૩૧૧ તસ્યાવલોકમધિકં કૃપયાતિઘોર
૦૩૨૮૦૩૧૨ તાપત્રયોપશમનાય નિસૃષ્ટમક્ષ્ણોઃ
૦૩૨૮૦૩૧૩ સ્નિગ્ધસ્મિતાનુગુણિતં વિપુલપ્રસાદં
૦૩૨૮૦૩૧૪ ધ્યાયેચ્ચિરં વિપુલભાવનયા ગુહાયામ્
૦૩૨૮૦૩૨૧ હાસં હરેરવનતાખિલલોકતીવ્ર
૦૩૨૮૦૩૨૨ શોકાશ્રુસાગરવિશોષણમત્યુદારમ્
૦૩૨૮૦૩૨૩ સમ્મોહનાય રચિતં નિજમાયયાસ્ય
૦૩૨૮૦૩૨૪ ભ્રૂમણ્ડલં મુનિકૃતે મકરધ્વજસ્ય
૦૩૨૮૦૩૩૧ ધ્યાનાયનં પ્રહસિતં બહુલાધરોષ્ઠ
૦૩૨૮૦૩૩૨ ભાસારુણાયિતતનુદ્વિજકુન્દપઙ્ક્તિ
૦૩૨૮૦૩૩૩ ધ્યાયેત્સ્વદેહકુહરેઽવસિતસ્ય વિષ્ણોર્
૦૩૨૮૦૩૩૪ ભક્ત્યાર્દ્રયાર્પિતમના ન પૃથગ્દિદૃક્ષેત્
૦૩૨૮૦૩૪૧ એવં હરૌ ભગવતિ પ્રતિલબ્ધભાવો

૦૩૨૮૦૩૪૨ ભક્ત્યા દ્રવદ્ધૃદય ઉત્પુલકઃ પ્રમોદાત્
૦૩૨૮૦૩૪૩ ઔત્કણ્ઠ્યબાષ્પકલયા મુહુરર્દ્યમાનસ્
૦૩૨૮૦૩૪૪ તચ્ચાપિ ચિત્તબડિશં શનકૈર્વિયુઙ્ક્તે
૦૩૨૮૦૩૫૧ મુક્તાશ્રયં યર્હિ નિર્વિષયં વિરક્તં
૦૩૨૮૦૩૫૨ નિર્વાણમૃચ્છતિ મનઃ સહસા યથાર્ચિઃ
૦૩૨૮૦૩૫૩ આત્માનમત્ર પુરુષોઽવ્યવધાનમેકમ્
૦૩૨૮૦૩૫૪ અન્વીક્ષતે પ્રતિનિવૃત્તગુણપ્રવાહઃ
૦૩૨૮૦૩૬૧ સોઽપ્યેતયા ચરમયા મનસો નિવૃત્ત્યા
૦૩૨૮૦૩૬૨ તસ્મિન્મહિમ્ન્યવસિતઃ સુખદુઃખબાહ્યે
૦૩૨૮૦૩૬૩ હેતુત્વમપ્યસતિ કર્તરિ દુઃખયોર્યત્
૦૩૨૮૦૩૬૪ સ્વાત્મન્વિધત્ત ઉપલબ્ધપરાત્મકાષ્ઠઃ
૦૩૨૮૦૩૭૧ દેહં ચ તં ન ચરમઃ સ્થિતમુત્થિતં વા
૦૩૨૮૦૩૭૨ સિદ્ધો વિપશ્યતિ યતોઽધ્યગમત્સ્વરૂપમ્
૦૩૨૮૦૩૭૩ દૈવાદુપેતમથ દૈવવશાદપેતં
૦૩૨૮૦૩૭૪ વાસો યથા પરિકૃતં મદિરામદાન્ધઃ
૦૩૨૮૦૩૮૧ દેહોઽપિ દૈવવશગઃ ખલુ કર્મ યાવત્
૦૩૨૮૦૩૮૨ સ્વારમ્ભકં પ્રતિસમીક્ષત એવ સાસુઃ
૦૩૨૮૦૩૮૩ તં સપ્રપઞ્ચમધિરૂઢસમાધિયોગઃ
૦૩૨૮૦૩૮૪ સ્વાપ્નં પુનર્ન ભજતે પ્રતિબુદ્ધવસ્તુઃ
૦૩૨૮૦૩૯૧ યથા પુત્રાચ્ચ વિત્તાચ્ચ પૃથઙ્મર્ત્યઃ પ્રતીયતે
૦૩૨૮૦૩૯૨ અપ્યાત્મત્વેનાભિમતાદ્દેહાદેઃ પુરુષસ્તથા
૦૩૨૮૦૪૦૧ યથોલ્મુકાદ્વિસ્ફુલિઙ્ગાદ્ધૂમાદ્વાપિ સ્વસમ્ભવાત્
૦૩૨૮૦૪૦૨ અપ્યાત્મત્વેનાભિમતાદ્યથાગ્નિઃ પૃથગુલ્મુકાત્
૦૩૨૮૦૪૧૧ ભૂતેન્દ્રિયાન્તઃકરણાત્પ્રધાનાજ્જીવસંજ્ઞિતાત્
૦૩૨૮૦૪૧૨ આત્મા તથા પૃથગ્દ્રષ્ટા ભગવાન્બ્રહ્મસંજ્ઞિતઃ
૦૩૨૮૦૪૨૧ સર્વભૂતેષુ ચાત્માનં સર્વભૂતાનિ ચાત્મનિ
૦૩૨૮૦૪૨૨ ઈક્ષેતાનન્યભાવેન ભૂતેષ્વિવ તદાત્મતામ્
૦૩૨૮૦૪૩૧ સ્વયોનિષુ યથા જ્યોતિરેકં નાના પ્રતીયતે
૦૩૨૮૦૪૩૨ યોનીનાં ગુણવૈષમ્યાત્તથાત્મા પ્રકૃતૌ સ્થિતઃ
૦૩૨૮૦૪૪૧ તસ્માદિમાં સ્વાં પ્રકૃતિં દૈવીં સદસદાત્મિકામ્
૦૩૨૮૦૪૪૨ દુર્વિભાવ્યાં પરાભાવ્ય સ્વરૂપેણાવતિષ્ઠતે

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે

પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયે સાધનાનુષ્ઠાનં
નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૨૮ ॥

---

૦૩૨૯૦૦૧૦ દેવહૂતિરુવાચ
૦૩૨૯૦૦૧૧ લક્ષણં મહદાદીનાં પ્રકૃતેઃ પુરુષસ્ય ચ
૦૩૨૯૦૦૧૨ સ્વરૂપં લક્ષ્યતેઽમીષાં યેન તત્પારમાર્થિકમ્
૦૩૨૯૦૦૨૧ યથા સાઙ્ખ્યેષુ કથિતં યન્મૂલં તત્પ્રચક્ષતે
૦૩૨૯૦૦૨૨ ભક્તિયોગસ્ય મે માર્ગં બ્રૂહિ વિસ્તરશઃ પ્રભો
૦૩૨૯૦૦૩૧ વિરાગો યેન પુરુષો ભગવન્સર્વતો ભવેત્
૦૩૨૯૦૦૩૨ આચક્ષ્વ જીવલોકસ્ય વિવિધા મમ સંસૃતીઃ
૦૩૨૯૦૦૪૧ કાલસ્યેશ્વરરૂપસ્ય પરેષાં ચ પરસ્ય તે
૦૩૨૯૦૦૪૨ સ્વરૂપં બત કુર્વન્તિ યદ્ધેતોઃ કુશલં જનાઃ
૦૩૨૯૦૦૫૧ લોકસ્ય મિથ્યાભિમતેરચક્ષુષશ્ચિરં પ્રસુપ્તસ્ય તમસ્યનાશ્રયે
૦૩૨૯૦૦૫૨ શ્રાન્તસ્ય કર્મસ્વનુવિદ્ધયા ધિયા ત્વમાવિરાસીઃ કિલ યોગભાસ્કરઃ
૦૩૨૯૦૦૬૦ મૈત્રેય ઉવાચ
૦૩૨૯૦૦૬૧ ઇતિ માતુર્વચઃ શ્લક્ષ્ણં પ્રતિનન્દ્ય મહામુનિઃ
૦૩૨૯૦૦૬૨ આબભાષે કુરુશ્રેષ્ઠ પ્રીતસ્તાં કરુણાર્દિતઃ
૦૩૨૯૦૦૭૦ શ્રીભગવાનુવાચ
૦૩૨૯૦૦૭૧ ભક્તિયોગો બહુવિધો માર્ગૈર્ભામિનિ ભાવ્યતે
૦૩૨૯૦૦૭૨ સ્વભાવગુણમાર્ગેણ પુંસાં ભાવો વિભિદ્યતે
૦૩૨૯૦૦૮૧ અભિસન્ધાય યો હિંસાં દમ્ભં માત્સર્યમેવ વા
૦૩૨૯૦૦૮૨ સંરમ્ભી ભિન્નદૃગ્ભાવં મયિ કુર્યાત્સ તામસઃ
૦૩૨૯૦૦૯૧ વિષયાનભિસન્ધાય યશ ઐશ્વર્યમેવ વા
૦૩૨૯૦૦૯૨ અર્ચાદાવર્ચયેદ્યો માં પૃથગ્ભાવઃ સ રાજસઃ
૦૩૨૯૦૧૦૧ કર્મનિર્હારમુદ્દિશ્ય પરસ્મિન્વા તદર્પણમ્
૦૩૨૯૦૧૦૨ યજેદ્યષ્ટવ્યમિતિ વા પૃથગ્ભાવઃ સ સાત્ત્વિકઃ
૦૩૨૯૦૧૧૧ મદ્ગુણશ્રુતિમાત્રેણ મયિ સર્વગુહાશયે
૦૩૨૯૦૧૧૨ મનોગતિરવિચ્છિન્ના યથા ગઙ્ગામ્ભસોઽમ્બુધૌ
૦૩૨૯૦૧૨૧ લક્ષણં ભક્તિયોગસ્ય નિર્ગુણસ્ય હ્યુદાહૃતમ્
૦૩૨૯૦૧૨૨ અહૈતુક્યવ્યવહિતા યા ભક્તિઃ પુરુષોત્તમે
૦૩૨૯૦૧૩૧ સાલોક્યસાર્ષ્ટિસામીપ્ય સારૂપ્યૈકત્વમપ્યુત

૦૩૨૯૦૧૩૨ દીયમાનં ન ગૃહ્ણન્તિ વિના મત્સેવનં જનાઃ
૦૩૨૯૦૧૪૧ સ એવ ભક્તિયોગાખ્ય આત્યન્તિક ઉદાહૃતઃ
૦૩૨૯૦૧૪૨ યેનાતિવ્રજ્ય ત્રિગુણં મદ્ભાવાયોપપદ્યતે
૦૩૨૯૦૧૫૧ નિષેવિતેનાનિમિત્તેન સ્વધર્મેણ મહીયસા
૦૩૨૯૦૧૫૨ ક્રિયાયોગેન શસ્તેન નાતિહિંસ્રેણ નિત્યશઃ
૦૩૨૯૦૧૬૧ મદ્ધિષ્ણ્યદર્શનસ્પર્શ પૂજાસ્તુત્યભિવન્દનૈઃ
૦૩૨૯૦૧૬૨ ભૂતેષુ મદ્ભાવનયા સત્ત્વેનાસઙ્ગમેન ચ
૦૩૨૯૦૧૭૧ મહતાં બહુમાનેન દીનાનામનુકમ્પયા
૦૩૨૯૦૧૭૨ મૈત્ર્યા ચૈવાત્મતુલ્યેષુ યમેન નિયમેન ચ
૦૩૨૯૦૧૮૧ આધ્યાત્મિકાનુશ્રવણાન્નામસઙ્કીર્તનાચ્ચ મે
૦૩૨૯૦૧૮૨ આર્જવેનાર્યસઙ્ગેન નિરહઙ્ક્રિયયા તથા
૦૩૨૯૦૧૯૧ મદ્ધર્મણો ગુણૈરેતૈઃ પરિસંશુદ્ધ આશયઃ
૦૩૨૯૦૧૯૨ પુરુષસ્યાઞ્જસાભ્યેતિ શ્રુતમાત્રગુણં હિ મામ્
૦૩૨૯૦૨૦૧ યથા વાતરથો ઘ્રાણમાવૃઙ્ક્તે ગન્ધ આશયાત્
૦૩૨૯૦૨૦૨ એવં યોગરતં ચેત આત્માનમવિકારિ યત્
૦૩૨૯૦૨૧૧ અહં સર્વેષુ ભૂતેષુ ભૂતાત્માવસ્થિતઃ સદા
૦૩૨૯૦૨૧૨ તમવજ્ઞાય માં મર્ત્યઃ કુરુતેઽર્ચાવિડમ્બનમ્
૦૩૨૯૦૨૨૧ યો માં સર્વેષુ ભૂતેષુ સન્તમાત્માનમીશ્વરમ્
૦૩૨૯૦૨૨૨ હિત્વાર્ચાં ભજતે મૌઢ્યાદ્ભસ્મન્યેવ જુહોતિ સઃ
૦૩૨૯૦૨૩૧ દ્વિષતઃ પરકાયે માં માનિનો ભિન્નદર્શિનઃ
૦૩૨૯૦૨૩૨ ભૂતેષુ બદ્ધવૈરસ્ય ન મનઃ શાન્તિમૃચ્છતિ
૦૩૨૯૦૨૪૧ અહમુચ્ચાવચૈર્દ્રવ્યૈઃ ક્રિયયોત્પન્નયાનઘે
૦૩૨૯૦૨૪૨ નૈવ તુષ્યેઽર્ચિતોઽર્ચાયાં ભૂતગ્રામાવમાનિનઃ
૦૩૨૯૦૨૫૧ અર્ચાદાવર્ચયેત્તાવદીશ્વરં માં સ્વકર્મકૃત્
૦૩૨૯૦૨૫૨ યાવન્ન વેદ સ્વહૃદિ સર્વભૂતેષ્વવસ્થિતમ્
૦૩૨૯૦૨૬૧ આત્મનશ્ચ પરસ્યાપિ યઃ કરોત્યન્તરોદરમ્
૦૩૨૯૦૨૬૨ તસ્ય ભિન્નદૃશો મૃત્યુર્વિદધે ભયમુલ્બણમ્
૦૩૨૯૦૨૭૧ અથ માં સર્વભૂતેષુ ભૂતાત્માનં કૃતાલયમ્
૦૩૨૯૦૨૭૨ અર્હયેદ્દાનમાનાભ્યાં મૈત્ર્યાભિન્નેન ચક્ષુષા
૦૩૨૯૦૨૮૧ જીવાઃ શ્રેષ્ઠા હ્યજીવાનાં તતઃ પ્રાણભૃતઃ શુભે
૦૩૨૯૦૨૮૨ તતઃ સચિત્તાઃ પ્રવરાસ્તતશ્ચેન્દ્રિયવૃત્તયઃ
૦૩૨૯૦૨૯૧ તત્રાપિ સ્પર્શવેદિભ્યઃ પ્રવરા રસવેદિનઃ

૦૩૨૯૦૨૯૨ તેભ્યો ગન્ધવિદઃ શ્રેષ્ઠાસ્તતઃ શબ્દવિદો વરાઃ
૦૩૨૯૦૩૦૧ રૂપભેદવિદસ્તત્ર તતશ્ચોભયતોદતઃ
૦૩૨૯૦૩૦૨ તેષાં બહુપદાઃ શ્રેષ્ઠાશ્ચતુષ્પાદસ્તતો દ્વિપાત્
૦૩૨૯૦૩૧૧ તતો વર્ણાશ્ચ ચત્વારસ્તેષાં બ્રાહ્મણ ઉત્તમઃ
૦૩૨૯૦૩૧૨ બ્રાહ્મણેષ્વપિ વેદજ્ઞો હ્યર્થજ્ઞોઽભ્યધિકસ્તતઃ
૦૩૨૯૦૩૨૧ અર્થજ્ઞાત્સંશયચ્છેત્તા તતઃ શ્રેયાન્સ્વકર્મકૃત્
૦૩૨૯૦૩૨૨ મુક્તસઙ્ગસ્તતો ભૂયાનદોગ્ધા ધર્મમાત્મનઃ
૦૩૨૯૦૩૩૧ તસ્માન્મય્યર્પિતાશેષ ક્રિયાર્થાત્મા નિરન્તરઃ
૦૩૨૯૦૩૩૨ મય્યર્પિતાત્મનઃ પુંસો મયિ સન્ન્યસ્તકર્મણઃ
૦૩૨૯૦૩૩૩ ન પશ્યામિ પરં ભૂતમકર્તુઃ સમદર્શનાત્
૦૩૨૯૦૩૪૧ મનસૈતાનિ ભૂતાનિ પ્રણમેદ્બહુમાનયન્
૦૩૨૯૦૩૪૨ ઈશ્વરો જીવકલયા પ્રવિષ્ટો ભગવાનિતિ
૦૩૨૯૦૩૫૧ ભક્તિયોગશ્ચ યોગશ્ચ મયા માનવ્યુદીરિતઃ
૦૩૨૯૦૩૫૨ યયોરેકતરેણૈવ પુરુષઃ પુરુષં વ્રજેત્
૦૩૨૯૦૩૬૧ એતદ્ભગવતો રૂપં બ્રહ્મણઃ પરમાત્મનઃ
૦૩૨૯૦૩૬૨ પરં પ્રધાનં પુરુષં દૈવં કર્મવિચેષ્ટિતમ્
૦૩૨૯૦૩૭૧ રૂપભેદાસ્પદં દિવ્યં કાલ ઇત્યભિધીયતે
૦૩૨૯૦૩૭૨ ભૂતાનાં મહદાદીનાં યતો ભિન્નદૃશાં ભયમ્
૦૩૨૯૦૩૮૧ યોઽન્તઃ પ્રવિશ્ય ભૂતાનિ ભૂતૈરત્ત્યખિલાશ્રયઃ
૦૩૨૯૦૩૮૨ સ વિષ્ણ્વાખ્યોઽધિયજ્ઞોઽસૌ કાલઃ કલયતાં પ્રભુઃ
૦૩૨૯૦૩૯૧ ન ચાસ્ય કશ્ચિદ્દયિતો ન દ્વેષ્યો ન ચ બાન્ધવઃ
૦૩૨૯૦૩૯૨ આવિશત્યપ્રમત્તોઽસૌ પ્રમત્તં જનમન્તકૃત્
૦૩૨૯૦૪૦૧ યદ્ભયાદ્વાતિ વાતોઽયં સૂર્યસ્તપતિ યદ્ભયાત્
૦૩૨૯૦૪૦૨ યદ્ભયાદ્વર્ષતે દેવો ભગણો ભાતિ યદ્ભયાત્
૦૩૨૯૦૪૧૧ યદ્વનસ્પતયો ભીતા લતાશ્ચૌષધિભિઃ સહ
૦૩૨૯૦૪૧૨ સ્વે સ્વે કાલેઽભિગૃહ્ણન્તિ પુષ્પાણિ ચ ફલાનિ ચ
૦૩૨૯૦૪૨૧ સ્રવન્તિ સરિતો ભીતા નોત્સર્પત્યુદધિર્યતઃ
૦૩૨૯૦૪૨૨ અગ્નિરિન્ધે સગિરિભિર્ભૂર્ન મજ્જતિ યદ્ભયાત્
૦૩૨૯૦૪૩૧ નભો દદાતિ શ્વસતાં પદં યન્નિયમાદદઃ
૦૩૨૯૦૪૩૨ લોકં સ્વદેહં તનુતે મહાન્સપ્તભિરાવૃતમ્
૦૩૨૯૦૪૪૧ ગુણાભિમાનિનો દેવાઃ સર્ગાદિષ્વસ્ય યદ્ભયાત્
૦૩૨૯૦૪૪૨ વર્તન્તેઽનુયુગં યેષાં વશ એતચ્ચરાચરમ્

૦૩૨૯૦૪૫૧ સોઽનન્તોઽન્તકરઃ કાલોઽનાદિરાદિકૃદવ્યયઃ
૦૩૨૯૦૪૫૨ જનં જનેન જનયન્મારયન્મૃત્યુનાન્તકમ્
ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે
પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયોપાખ્યાને
એકોનત્રિંશોઽધ્યાયઃ ॥ ૨૯ ॥

---

૦૩૩૦૦૦૧૦ કપિલ ઉવાચ
૦૩૩૦૦૦૧૧ તસ્યૈતસ્ય જનો નૂનં નાયં વેદોરુવિક્રમમ્
૦૩૩૦૦૦૧૨ કાલ્યમાનોઽપિ બલિનો વાયોરિવ ઘનાવલિઃ
૦૩૩૦૦૦૨૧ યં યમર્થમુપાદત્તે દુઃખેન સુખહેતવે
૦૩૩૦૦૦૨૨ તં તં ધુનોતિ ભગવાન્પુમાઞ્છોચતિ યત્કૃતે
૦૩૩૦૦૦૩૧ યદધ્રુવસ્ય દેહસ્ય સાનુબન્ધસ્ય દુર્મતિઃ
૦૩૩૦૦૦૩૨ ધ્રુવાણિ મન્યતે મોહાદ્ગૃહક્ષેત્રવસૂનિ ચ
૦૩૩૦૦૦૪૧ જન્તુર્વૈ ભવ એતસ્મિન્યાં યાં યોનિમનુવ્રજેત્
૦૩૩૦૦૦૪૨ તસ્યાં તસ્યાં સ લભતે નિર્વૃતિં ન વિરજ્યતે
૦૩૩૦૦૦૫૧ નરકસ્થોઽપિ દેહં વૈ ન પુમાંસ્ત્યક્તુમિચ્છતિ
૦૩૩૦૦૦૫૨ નારક્યાં નિર્વૃતૌ સત્યાં દેવમાયાવિમોહિતઃ
૦૩૩૦૦૦૬૧ આત્મજાયાસુતાગાર પશુદ્રવિણબન્ધુષુ
૦૩૩૦૦૦૬૨ નિરૂઢમૂલહૃદય આત્માનં બહુ મન્યતે
૦૩૩૦૦૦૭૧ સન્દહ્યમાનસર્વાઙ્ગ એષામુદ્વહનાધિના
૦૩૩૦૦૦૭૨ કરોત્યવિરતં મૂઢો દુરિતાનિ દુરાશયઃ
૦૩૩૦૦૦૮૧ આક્ષિપ્તાત્મેન્દ્રિયઃ સ્ત્રીણામસતીનાં ચ માયયા
૦૩૩૦૦૦૮૨ રહો રચિતયાલાપૈઃ શિશૂનાં કલભાષિણામ્
૦૩૩૦૦૦૯૧ ગૃહેષુ કૂટધર્મેષુ દુઃખતન્ત્રેષ્વતન્દ્રિતઃ
૦૩૩૦૦૦૯૨ કુર્વન્દુઃખપ્રતીકારં સુખવન્મન્યતે ગૃહી
૦૩૩૦૦૧૦૧ અર્થૈરાપાદિતૈર્ગુર્વ્યા હિંસયેતસ્તતશ્ચ તાન્
૦૩૩૦૦૧૦૨ પુષ્ણાતિ યેષાં પોષેણ શેષભુગ્યાત્યધઃ સ્વયમ્
૦૩૩૦૦૧૧૧ વાર્તાયાં લુપ્યમાનાયામારબ્ધાયાં પુનઃ પુનઃ
૦૩૩૦૦૧૧૨ લોભાભિભૂતો નિઃસત્ત્વઃ પરાર્થે કુરુતે સ્પૃહામ્
૦૩૩૦૦૧૨૧ કુટુમ્બભરણાકલ્પો મન્દભાગ્યો વૃથોદ્યમઃ
૦૩૩૦૦૧૨૨ શ્રિયા વિહીનઃ કૃપણો ધ્યાયઞ્છ્વસિતિ મૂઢધીઃ

૦૩૩૦૦૧૩૧ એવં સ્વભરણાકલ્પં તત્કલત્રાદયસ્તથા

૦૩૩૦૦૧૩૨ નાદ્રિયન્તે યથા પૂર્વં કીનાશા ઇવ ગોજરમ્

૦૩૩૦૦૧૪૧ તત્રાપ્યજાતનિર્વેદો ભ્રિયમાણઃ સ્વયમ્ભૃતૈઃ

૦૩૩૦૦૧૪૨ જરયોપાત્તવૈરૂપ્યો મરણાભિમુખો ગૃહે

૦૩૩૦૦૧૫૧ આસ્તેઽવમત્યોપન્યસ્તં ગૃહપાલ ઇવાહરન્

૦૩૩૦૦૧૫૨ આમયાવ્યપ્રદીપ્તાગ્નિરલ્પાહારોઽલ્પચેષ્ટિતઃ

૦૩૩૦૦૧૬૧ વાયુનોત્ક્રમતોત્તારઃ કફસંરુદ્ધનાડિકઃ

૦૩૩૦૦૧૬૨ કાસશ્વાસકૃતાયાસઃ કણ્ઠે ઘુરઘુરાયતે

૦૩૩૦૦૧૭૧ શયાનઃ પરિશોચદ્ભિઃ પરિવીતઃ સ્વબન્ધુભિઃ

૦૩૩૦૦૧૭૨ વાચ્યમાનોઽપિ ન બ્રૂતે કાલપાશવશં ગતઃ

૦૩૩૦૦૧૮૧ એવં કુટુમ્બભરણે વ્યાપૃતાત્માજિતેન્દ્રિયઃ

૦૩૩૦૦૧૮૨ મ્રિયતે રુદતાં સ્વાનામુરુવેદનયાસ્તધીઃ

૦૩૩૦૦૧૯૧ યમદૂતૌ તદા પ્રાપ્તૌ ભીમૌ સરભસેક્ષણૌ

૦૩૩૦૦૧૯૨ સ દૃષ્ટ્વા ત્રસ્તહૃદયઃ શકૃન્મૂત્રં વિમુઞ્ચતિ

૦૩૩૦૦૨૦૧ યાતનાદેહ આવૃત્ય પાશૈર્બદ્ધ્વા ગલે બલાત્

૦૩૩૦૦૨૦૨ નયતો દીર્ઘમધ્વાનં દણ્ડ્યં રાજભટા યથા

૦૩૩૦૦૨૧૧ તયોર્નિર્ભિન્નહૃદયસ્તર્જનૈર્જાતવેપથુઃ

૦૩૩૦૦૨૧૨ પથિ શ્વભિર્ભક્ષ્યમાણ આર્તોઽઘં સ્વમનુસ્મરન્

૦૩૩૦૦૨૨૧ ક્ષુત્તૃટ્પરીતોઽર્કદવાનલાનિલૈઃ સન્તપ્યમાનઃ પથિ તપ્તવાલુકે

૦૩૩૦૦૨૨૨ કૃચ્છ્રેણ પૃષ્ઠે કશયા ચ તાડિતશ્ચલત્યશક્તોઽપિ નિરાશ્રમોદકે

૦૩૩૦૦૨૩૧ તત્ર તત્ર પતન્છ્રાન્તો મૂર્ચ્છિતઃ પુનરુત્થિતઃ

૦૩૩૦૦૨૩૨ પથા પાપીયસા નીતસ્તરસા યમસાદનમ્

૦૩૩૦૦૨૪૧ યોજનાનાં સહસ્રાણિ નવતિં નવ ચાધ્વનઃ

૦૩૩૦૦૨૪૨ ત્રિભિર્મુહૂર્તૈર્દ્વાભ્યાં વા નીતઃ પ્રાપ્નોતિ યાતનાઃ

૦૩૩૦૦૨૫૧ આદીપનં સ્વગાત્રાણાં વેષ્ટયિત્વોલ્મુકાદિભિઃ

૦૩૩૦૦૨૫૨ આત્મમાંસાદનં ક્વાપિ સ્વકૃત્તં પરતોઽપિ વા

૦૩૩૦૦૨૬૧ જીવતશ્ચાન્ત્રાભ્યુદ્ધારઃ શ્વગૃધ્રૈર્યમસાદને

૦૩૩૦૦૨૬૨ સર્પવૃશ્ચિકદંશાદ્યૈર્દશદ્ભિશ્ચાત્મવૈશસમ્

૦૩૩૦૦૨૭૧ કૃન્તનં ચાવયવશો ગજાદિભ્યો ભિદાપનમ્

૦૩૩૦૦૨૭૨ પાતનં ગિરિશ◌ૃઙ્ગેભ્યો રોધનં ચામ્બુગર્તયોઃ

૦૩૩૦૦૨૮૧ યાસ્તામિસ્રાન્ધતામિસ્રા રૌરવાદ્યાશ્ચ યાતનાઃ

૦૩૩૦૦૨૮૨ ભુઙ્ક્તે નરો વા નારી વા મિથઃ સઙ્ગેન નિર્મિતાઃ

૦૩૩૦૦૨૯૧ અત્રૈવ નરકઃ સ્વર્ગ ઇતિ માતઃ પ્રચક્ષતે
૦૩૩૦૦૨૯૨ યા યાતના વૈ નારક્યસ્તા ઇહાપ્યુપલક્ષિતાઃ
૦૩૩૦૦૩૦૧ એવં કુટુમ્બં બિભ્રાણ ઉદરમ્ભર એવ વા
૦૩૩૦૦૩૦૨ વિસૃજ્યેહોભયં પ્રેત્ય ભુઙ્ક્તે તત્ફલમીદૃશમ્
૦૩૩૦૦૩૧૧ એકઃ પ્રપદ્યતે ધ્વાન્તં હિત્વેદં સ્વકલેવરમ્
૦૩૩૦૦૩૧૨ કુશલેતરપાથેયો ભૂતદ્રોહેણ યદ્ભૃતમ્
૦૩૩૦૦૩૨૧ દૈવેનાસાદિતં તસ્ય શમલં નિરયે પુમાન્
૦૩૩૦૦૩૨૨ ભુઙ્ક્તે કુટુમ્બપોષસ્ય હૃતવિત્ત ઇવાતુરઃ
૦૩૩૦૦૩૩૧ કેવલેન હ્યધર્મેણ કુટુમ્બભરણોત્સુકઃ
૦૩૩૦૦૩૩૨ યાતિ જીવોઽન્ધતામિસ્રં ચરમં તમસઃ પદમ્
૦૩૩૦૦૩૪૧ અધસ્તાન્નરલોકસ્ય યાવતીર્યાતનાદયઃ
૦૩૩૦૦૩૪૨ ક્રમશઃ સમનુક્રમ્ય પુનરત્રાવ્રજેચ્છુચિઃ

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે
પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયોપાખ્યાને
કર્મવિપાકોનામ ત્રિંશોઽધ્યાયઃ ॥ ૩૦ ॥

---

૦૩૩૦૦૦૧૦ શ્રીભગવાનુવાચ
૦૩૩૧૦૦૧૧ કર્મણા દૈવનેત્રેણ જન્તુર્દેહોપપત્તયે
૦૩૩૧૦૦૧૨ સ્ત્રિયાઃ પ્રવિષ્ટ ઉદરં પુંસો રેતઃકણાશ્રયઃ
૦૩૩૧૦૦૨૧ કલલં ત્વેકરાત્રેણ પઞ્ચરાત્રેણ બુદ્બુદમ્
૦૩૩૧૦૦૨૨ દશાહેન તુ કર્કન્ધૂઃ પેશ્યણ્ડં વા તતઃ પરમ્
૦૩૩૧૦૦૩૧ માસેન તુ શિરો દ્વાભ્યાં બાહ્વઙ્ઘ્ર્યાદ્યઙ્ગવિગ્રહઃ
૦૩૩૧૦૦૩૨ નખલોમાસ્થિચર્માણિ લિઙ્ગચ્છિદ્રોદ્ભવસ્ત્રિભિઃ
૦૩૩૧૦૦૪૧ ચતુર્ભિર્ધાતવઃ સપ્ત પઞ્ચભિઃ ક્ષુત્તૃડુદ્ભવઃ
૦૩૩૧૦૦૪૨ ષડ્ભિર્જરાયુણા વીતઃ કુક્ષૌ ભ્રામ્યતિ દક્ષિણે
૦૩૩૧૦૦૫૧ માતુર્જગ્ધાન્નપાનાદ્યૈરેધદ્ધાતુરસમ્મતે
૦૩૩૧૦૦૫૨ શેતે વિણ્મૂત્રયોર્ગર્તે સ જન્તુર્જન્તુસમ્ભવે
૦૩૩૧૦૦૬૧ કૃમિભિઃ ક્ષતસર્વાઙ્ગઃ સૌકુમાર્યાત્પ્રતિક્ષણમ્
૦૩૩૧૦૦૬૨ મૂર્ચ્છામાપ્નોત્યુરુક્લેશસ્તત્રત્યૈઃ ક્ષુધિતૈર્મુહુઃ
૦૩૩૧૦૦૭૧ કટુતીક્ષ્ણોષ્ણલવણ રૂક્ષામ્લાદિભિરુલ્બણૈઃ
૦૩૩૧૦૦૭૨ માતૃભુક્તૈરુપસ્પૃષ્ટઃ સર્વાઙ્ગોત્થિતવેદનઃ

૦૩૩૧૦૦૮૧ ઉલ્બેન સંવૃતસ્તસ્મિન્નન્ત્રૈશ્ચ બહિરાવૃતઃ
૦૩૩૧૦૦૮૨ આસ્તે કૃત્વા શિરઃ કુક્ષૌ ભુગ્નપૃષ્ઠશિરોધરઃ
૦૩૩૧૦૦૯૧ અકલ્પઃ સ્વાઙ્ગચેષ્ટાયાં શકુન્ત ઇવ પઞ્જરે
૦૩૩૧૦૦૯૨ તત્ર લબ્ધસ્મૃતિર્દૈવાત્કર્મ જન્મશતોદ્ભવમ્
૦૩૩૧૦૦૯૩ સ્મરન્દીર્ઘમનુચ્છ્વાસં શર્મ કિં નામ વિન્દતે
૦૩૩૧૦૧૦૧ આરભ્ય સપ્તમાન્માસાલ્લબ્ધબોધોઽપિ વેપિતઃ
૦૩૩૧૦૧૦૨ નૈકત્રાસ્તે સૂતિવાતૈર્વિષ્ઠાભૂરિવ સોદરઃ
૦૩૩૧૦૧૧૧ નાથમાન ઋષિર્ભીતઃ સપ્તવધ્રિઃ કૃતાઞ્જલિઃ
૦૩૩૧૦૧૧૨ સ્તુવીત તં વિક્લવયા વાચા યેનોદરેઽર્પિતઃ
૦૩૩૧૦૧૨૦ જન્તુરુવાચ
૦૩૩૧૦૧૨૧ તસ્યોપસન્નમવિતું જગદિચ્છયાત્ત
૦૩૩૧૦૧૨૨ નાનાતનોર્ભુવિ ચલચ્ચરણારવિન્દમ્
૦૩૩૧૦૧૨૩ સોઽહં વ્રજામિ શરણં હ્યકુતોભયં મે
૦૩૩૧૦૧૨૪ યેનેદૃશી ગતિરદર્શ્યસતોઽનુરૂપા
૦૩૩૧૦૧૩૧ યસ્ત્વત્ર બદ્ધ ઇવ કર્મભિરાવૃતાત્મા
૦૩૩૧૦૧૩૨ ભૂતેન્દ્રિયાશયમયીમવલમ્બ્ય માયામ્
૦૩૩૧૦૧૩૩ આસ્તે વિશુદ્ધમવિકારમખણ્ડબોધમ્
૦૩૩૧૦૧૩૪ આતપ્યમાનહૃદયેઽવસિતં નમામિ
૦૩૩૧૦૧૪૧ યઃ પઞ્ચભૂતરચિતે રહિતઃ શરીરે
૦૩૩૧૦૧૪૨ ચ્છન્નોઽયથેન્દ્રિયગુણાર્થચિદાત્મકોઽહમ્
૦૩૩૧૦૧૪૩ તેનાવિકુણ્ઠમહિમાનમૃષિં તમેનં
૦૩૩૧૦૧૪૪ વન્દે પરં પ્રકૃતિપૂરુષયોઃ પુમાંસમ્
૦૩૩૧૦૧૫૧ યન્માયયોરુગુણકર્મનિબન્ધનેઽસ્મિન્
૦૩૩૧૦૧૫૨ સાંસારિકે પથિ ચરંસ્તદભિશ્રમેણ
૦૩૩૧૦૧૫૩ નષ્ટસ્મૃતિઃ પુનરયં પ્રવૃણીત લોકં
૦૩૩૧૦૧૫૪ યુક્ત્યા કયા મહદનુગ્રહમન્તરેણ
૦૩૩૧૦૧૬૧ જ્ઞાનં યદેતદદધાત્કતમઃ સ દેવસ્
૦૩૩૧૦૧૬૨ ત્રૈકાલિકં સ્થિરચરેષ્વનુવર્તિતાંશઃ
૦૩૩૧૦૧૬૩ તં જીવકર્મપદવીમનુવર્તમાનાસ્
૦૩૩૧૦૧૬૪ તાપત્રયોપશમનાય વયં ભજેમ
૦૩૩૧૦૧૭૧ દેહ્યન્યદેહવિવરે જઠરાગ્નિનાસૃગ્
૦૩૩૧૦૧૭૨ વિણ્મૂત્રકૂપપતિતો ભૃશતપ્તદેહઃ

૦૩૩૧૦૧૭૩ ઇચ્છન્નિતો વિવસિતું ગણયન્સ્વમાસાન્
૦૩૩૧૦૧૭૪ નિર્વાસ્યતે કૃપણધીર્ભગવન્કદા નુ
૦૩૩૧૦૧૮૧ યેનેદૃશીં ગતિમસૌ દશમાસ્ય ઈશ
૦૩૩૧૦૧૮૨ સઙ્ગ્રાહિતઃ પુરુદયેન ભવાદૃશેન
૦૩૩૧૦૧૮૩ સ્વેનૈવ તુષ્યતુ કૃતેન સ દીનનાથઃ
૦૩૩૧૦૧૮૪ કો નામ તત્પ્રતિ વિનાઞ્જલિમસ્ય કુર્યાત્
૦૩૩૧૦૧૯૧ પશ્યત્યયં ધિષણયા નનુ સપ્તવધ્રિઃ
૦૩૩૧૦૧૯૨ શારીરકે દમશરીર્યપરઃ સ્વદેહે
૦૩૩૧૦૧૯૩ યત્સૃષ્ટયાસં તમહં પુરુષં પુરાણં
૦૩૩૧૦૧૯૪ પશ્યે બહિર્હૃદિ ચ ચૈત્યમિવ પ્રતીતમ્
૦૩૩૧૦૨૦૧ સોઽહં વસન્નપિ વિભો બહુદુઃખવાસં
૦૩૩૧૦૨૦૨ ગર્ભાન્ન નિર્જિગમિષે બહિરન્ધકૂપે
૦૩૩૧૦૨૦૩ યત્રોપયાતમુપસર્પતિ દેવમાયા
૦૩૩૧૦૨૦૪ મિથ્યા મતિર્યદનુ સંસૃતિચક્રમેતત્
૦૩૩૧૦૨૧૧ તસ્માદહં વિગતવિક્લવ ઉદ્ધરિષ્ય
૦૩૩૧૦૨૧૨ આત્માનમાશુ તમસઃ સુહૃદાત્મનૈવ
૦૩૩૧૦૨૧૩ ભૂયો યથા વ્યસનમેતદનેકરન્ધ્રં
૦૩૩૧૦૨૧૪ મા મે ભવિષ્યદુપસાદિતવિષ્ણુપાદઃ

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે
પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયોપાખ્યાને
જીવગતિર્નામૈકત્રિંશોઽધ્યાયઃ ॥ ૩૧ ॥

---

૦૩૩૨૦૨૨૦ કપિલ ઉવાચ
૦૩૩૨૦૨૨૧ એવં કૃતમતિર્ગર્ભે દશમાસ્યઃ સ્તુવન્નૃષિઃ
૦૩૩૨૦૨૨૨ સદ્યઃ ક્ષિપત્યવાચીનં પ્રસૂત્યૈ સૂતિમારુતઃ
૦૩૩૨૦૨૩૧ તેનાવસૃષ્ટઃ સહસા કૃત્વાવાક્શિર આતુરઃ
૦૩૩૨૦૨૩૨ વિનિષ્ક્રામતિ કૃચ્છ્રેણ નિરુચ્છ્વાસો હતસ્મૃતિઃ
૦૩૩૨૦૨૪૧ પતિતો ભુવ્યસૃઙ્મિશ્રઃ વિષ્ઠાભૂરિવ ચેષ્ટતે
૦૩૩૨૦૨૪૨ રોરૂયતિ ગતે જ્ઞાને વિપરીતાં ગતિં ગતઃ
૦૩૩૨૦૨૫૧ પરચ્છન્દં ન વિદુષા પુષ્યમાણો જનેન સઃ
૦૩૩૨૦૨૫૨ અનભિપ્રેતમાપન્નઃ પ્રત્યાખ્યાતુમનીશ્વરઃ

૦૩૩૨૦૨૬૧ શાયિતોऽશુચિપર્યઙ્કે જન્તુઃ સ્વેદજદૂષિતે
૦૩૩૨૦૨૬૨ નેશઃ કણ્ડૂયનેऽઙ્ગાનામાસનોત્થાનચેષ્ટને
૦૩૩૨૦૨૭૧ તુદન્ત્યામત્વચં દંશા મશકા મત્કુણાદયઃ
૦૩૩૨૦૨૭૨ રુદન્તં વિગતજ્ઞાનં કૃમયઃ કૃમિકં યથા
૦૩૩૨૦૨૮૧ ઇત્યેવં શૈશવં ભુક્ત્વા દુઃખં પૌગણ્ડમેવ ચ
૦૩૩૨૦૨૮૨ અલબ્ધાભીપ્સિતોऽજ્ઞાનાદિદ્ધમન્યુઃ શુચાર્પિતઃ
૦૩૩૨૦૨૯૧ સહ દેહેન માનેન વર્ધમાનેન મન્યુના
૦૩૩૨૦૨૯૨ કરોતિ વિગ્રહં કામી કામિષ્વન્તાય ચાત્મનઃ
૦૩૩૨૦૩૦૧ ભૂતૈઃ પઞ્ચભિરારબ્ધે દેહે દેહ્યબુધોऽસકૃત્
૦૩૩૨૦૩૦૨ અહં મમેત્યસદ્ગ્રાહઃ કરોતિ કુમતિર્મતિમ્
૦૩૩૨૦૩૧૧ તદર્થં કુરુતે કર્મ યદ્બદ્ધો યાતિ સંસૃતિમ્
૦૩૩૨૦૩૧૨ યોऽનુયાતિ દદત્ક્લેશમવિદ્યાકર્મબન્ધનઃ
૦૩૩૨૦૩૨૧ યદ્યસદ્ભિઃ પથિ પુનઃ શિશ્નોદરકૃતોદ્યમૈઃ
૦૩૩૨૦૩૨૨ આસ્થિતો રમતે જન્તુસ્તમો વિશતિ પૂર્વવત્
૦૩૩૨૦૩૩૧ સત્યં શૌચં દયા મૌનં બુદ્ધિઃ શ્રીર્હ્રીર્યશઃ ક્ષમા
૦૩૩૨૦૩૩૨ શમો દમો ભગશ્ચેતિ યત્સઙ્ગાદ્યાતિ સઙ્ક્ષયમ્
૦૩૩૨૦૩૪૧ તેષ્વશાન્તેષુ મૂઢેષુ ખણ્ડિતાત્મસ્વસાધુષુ
૦૩૩૨૦૩૪૨ સઙ્ગં ન કુર્યાચ્છોચ્યેષુ યોષિત્ક્રીડામૃગેષુ ચ
૦૩૩૨૦૩૫૧ ન તથાસ્ય ભવેન્મોહો બન્ધશ્ચાન્યપ્રસઙ્ગતઃ
૦૩૩૨૦૩૫૨ યોષિત્સઙ્ગાદ્યથા પુંસો યથા તત્સઙ્ગિસઙ્ગતઃ
૦૩૩૨૦૩૬૧ પ્રજાપતિઃ સ્વાં દુહિતરં દૃષ્ટ્વા તદ્રૂપધર્ષિતઃ
૦૩૩૨૦૩૬૨ રોહિદ્ભૂતાં સોऽન્વધાવદૃક્ષરૂપી હતત્રપઃ
૦૩૩૨૦૩૭૧ તત્સૃષ્ટસૃષ્ટસૃષ્ટેષુ કો ન્વખણ્ડિતધીઃ પુમાન્
૦૩૩૨૦૩૭૨ ઋષિં નારાયણમૃતે યોષિન્મય્યેહ માયયા
૦૩૩૨૦૩૮૧ બલં મે પશ્ય માયાયાઃ સ્ત્રીમય્યા જયિનો દિશામ્
૦૩૩૨૦૩૮૨ યા કરોતિ પદાક્રાન્તાન્ભ્રૂવિજૃમ્ભેણ કેવલમ્
૦૩૩૨૦૩૯૧ સઙ્ગં ન કુર્યાત્પ્રમદાસુ જાતુ યોગસ્ય પારં પરમારુરુક્ષુઃ
૦૩૩૨૦૩૯૨ મત્સેવયા પ્રતિલબ્ધાત્મલાભો વદન્તિ યા નિરયદ્વારમસ્ય
૦૩૩૨૦૪૦૧ યોપયાતિ શનૈર્માયા યોષિદ્દેવવિનિર્મિતા
૦૩૩૨૦૪૦૨ તામીક્ષેતાત્મનો મૃત્યું તૃણૈઃ કૂપમિવાવૃતમ્
૦૩૩૨૦૪૧૧ યાં મન્યતે પતિં મોહાન્મન્માયામૃષભાયતીમ્
૦૩૩૨૦૪૧૨ સ્ત્રીત્વં સ્ત્રીસઙ્ગતઃ પ્રાપ્તો વિત્તાપત્યગૃહપ્રદમ્

૦૩૩૨૦૪૨૧ તામાત્મનો વિજાનીયાત્પત્યપત્યગૃહાત્મકમ્
૦૩૩૨૦૪૨૨ દૈવોપસાદિતં મૃત્યું મૃગયોર્ગાયનં યથા
૦૩૩૨૦૪૩૧ દેહેન જીવભૂતેન લોકાલ્લોકમનુવ્રજન્
૦૩૩૨૦૪૩૨ ભુઞ્જાન એવ કર્માણિ કરોત્યવિરતં પુમાન્
૦૩૩૨૦૪૪૧ જીવો હ્યસ્યાનુગો દેહો ભૂતેન્દ્રિયમનોમયઃ
૦૩૩૨૦૪૪૨ તન્નિરોધોઽસ્ય મરણમાવિર્ભાવસ્તુ સમ્ભવઃ
૦૩૩૨૦૪૫૧ દ્રવ્યોપલબ્ધિસ્થાનસ્ય દ્રવ્યેક્ષાયોગ્યતા યદા
૦૩૩૨૦૪૫૨ તત્પઞ્ચત્વમહંમાનાદુત્પત્તિર્દ્રવ્યદર્શનમ્
૦૩૩૨૦૪૬૧ યથાક્ષ્ણોર્દ્રવ્યાવયવ દર્શનાયોગ્યતા યદા
૦૩૩૨૦૪૬૨ તદૈવ ચક્ષુષો દ્રષ્ટુર્દ્રષ્ટૃત્વાયોગ્યતાનયોઃ
૦૩૩૨૦૪૭૧ તસ્માન્ન કાર્યઃ સન્ત્રાસો ન કાર્પણ્યં ન સમ્ભ્રમઃ
૦૩૩૨૦૪૭૨ બુદ્ધ્વા જીવગતિં ધીરો મુક્તસઙ્ગશ્ચરેદિહ
૦૩૩૨૦૪૮૧ સમ્યગ્દર્શનયા બુદ્ધ્યા યોગવૈરાગ્યયુક્તયા
૦૩૩૨૦૪૮૨ માયાવિરચિતે લોકે ચરેન્ન્યસ્ય કલેવરમ્
૦૩૩૨૦૦૧૦ કપિલ ઉવાચ
૦૩૩૨૦૦૧૧ અથ યો ગૃહમેધીયાન્ધર્માનેવાવસન્ગૃહે
૦૩૩૨૦૦૧૨ કામમર્થં ચ ધર્માન્સ્વાન્દોગ્ધિ ભૂયઃ પિપર્તિ તાન્
૦૩૩૨૦૦૨૧ સ ચાપિ ભગવદ્ધર્માત્કામમૂઢઃ પરાઙ્મુખઃ
૦૩૩૨૦૦૨૨ યજતે ક્રતુભિર્દેવાન્પિતંશ્ચ શ્રદ્ધયાન્વિતઃ
૦૩૩૨૦૦૩૧ તચ્છ્રદ્ધયાક્રાન્તમતિઃ પિતૃદેવવ્રતઃ પુમાન્
૦૩૩૨૦૦૩૨ ગત્વા ચાન્દ્રમસં લોકં સોમપાઃ પુનરેષ્યતિ
૦૩૩૨૦૦૪૧ યદા ચાહીન્દ્રશય્યાયાં શેતેઽનન્તાસનો હરિઃ
૦૩૩૨૦૦૪૨ તદા લોકા લયં યાન્તિ ત એતે ગૃહમેધિનામ્
૦૩૩૨૦૦૫૧ યે સ્વધર્માન્ન દુહ્યન્તિ ધીરાઃ કામાર્થહેતવે
૦૩૩૨૦૦૫૨ નિઃસઙ્ગા ન્યસ્તકર્માણઃ પ્રશાન્તાઃ શુદ્ધચેતસઃ
૦૩૩૨૦૦૬૧ નિવૃત્તિધર્મનિરતા નિર્મમા નિરહઙ્કૃતાઃ
૦૩૩૨૦૦૬૨ સ્વધર્માપ્તેન સત્ત્વેન પરિશુદ્ધેન ચેતસા
૦૩૩૨૦૦૭૧ સૂર્યદ્વારેણ તે યાન્તિ પુરુષં વિશ્વતોમુખમ્
૦૩૩૨૦૦૭૨ પરાવરેશં પ્રકૃતિમસ્યોત્પત્ત્યન્તભાવનમ્
૦૩૩૨૦૦૮૧ દ્વિપરાર્ધાવસાને યઃ પ્રલયો બ્રહ્મણસ્તુ તે
૦૩૩૨૦૦૮૨ તાવદધ્યાસતે લોકં પરસ્ય પરચિન્તકાઃ
૦૩૩૨૦૦૯૧ ક્ષ્મામ્ભોઽનલાનિલવિયન્મનૈન્દ્રિયાર્થ

૦૩૩૨૦૦૯૨ ભૂતાદિભિઃ પરિવૃતં પ્રતિસઞ્જિહીર્ષુઃ
૦૩૩૨૦૦૯૩ અવ્યાકૃતં વિશતિ યર્હિ ગુણત્રયાત્માકાલં
૦૩૩૨૦૦૯૪ પરાખ્યમનુભૂય પરઃ સ્વયમ્ભૂઃ
૦૩૩૨૦૧૦૧ એવં પરેત્ય ભગવન્તમનુપ્રવિષ્ટાયે
૦૩૩૨૦૧૦૨ યોગિનો જિતમરુન્મનસો વિરાગાઃ
૦૩૩૨૦૧૦૩ તેનૈવ સાકમમૃતં પુરુષં પુરાણં
૦૩૩૨૦૧૦૪ બ્રહ્મ પ્રધાનમુપયાન્ત્યગતાભિમાનાઃ
૦૩૩૨૦૧૧૧ અથ તં સર્વભૂતાનાં હૃત્પદ્મેષુ કૃતાલયમ્
૦૩૩૨૦૧૧૨ શ્રુતાનુભાવં શરણં વ્રજ ભાવેન ભામિનિ
૦૩૩૨૦૧૨૧ આદ્યઃ સ્થિરચરાણાં યો વેદગર્ભઃ સહર્ષિભિઃ
૦૩૩૨૦૧૨૨ યોગેશ્વરૈઃ કુમારાદ્યૈઃ સિદ્ધૈર્યોગપ્રવર્તકૈઃ
૦૩૩૨૦૧૩૧ ભેદદૃષ્ટ્યાભિમાનેન નિઃસઙ્ગેનાપિ કર્મણા
૦૩૩૨૦૧૩૨ કર્તૃત્વાત્સગુણં બ્રહ્મ પુરુષં પુરુષર્ષભમ્
૦૩૩૨૦૧૪૧ સ સંસૃત્ય પુનઃ કાલે કાલેનેશ્વરમૂર્તિના
૦૩૩૨૦૧૪૨ જાતે ગુણવ્યતિકરે યથાપૂર્વં પ્રજાયતે
૦૩૩૨૦૧૫૧ ઐશ્વર્યં પારમેષ્ઠ્યં ચ તેઽપિ ધર્મવિનિર્મિતમ્
૦૩૩૨૦૧૫૨ નિષેવ્ય પુનરાયાન્તિ ગુણવ્યતિકરે સતિ
૦૩૩૨૦૧૬૧ યે ત્વિહાસક્તમનસઃ કર્મસુ શ્રદ્ધયાન્વિતાઃ
૦૩૩૨૦૧૬૨ કુર્વન્ત્યપ્રતિષિદ્ધાનિ નિત્યાન્યપિ ચ કૃત્સ્નશઃ
૦૩૩૨૦૧૭૧ રજસા કુણ્ઠમનસઃ કામાત્માનોઽજિતેન્દ્રિયાઃ
૦૩૩૨૦૧૭૨ પિતૄન્યજન્ત્યનુદિનં ગૃહેષ્વભિરતાશયાઃ
૦૩૩૨૦૧૮૧ ત્રૈવર્ગિકાસ્તે પુરુષા વિમુખા હરિમેધસઃ
૦૩૩૨૦૧૮૨ કથાયાં કથનીયોરુ વિક્રમસ્ય મધુદ્વિષઃ
૦૩૩૨૦૧૯૧ નૂનં દૈવેન વિહતા યે ચાચ્યુતકથાસુધામ્
૦૩૩૨૦૧૯૨ હિત્વા શ ૃણ્વન્ત્યસદ્ગાથાઃ પુરીષમિવ વિડ્ભુજઃ
૦૩૩૨૦૨૦૧ દક્ષિણેન પથાર્યમ્ણઃ પિતૃલોકં વ્રજન્તિ તે
૦૩૩૨૦૨૦૨ પ્રજામનુ પ્રજાયન્તે શ્મશાનાન્તક્રિયાકૃતઃ
૦૩૩૨૦૨૧૧ તતસ્તે ક્ષીણસુકૃતાઃ પુનર્લોકમિમં સતિ
૦૩૩૨૦૨૧૧ પતન્તિ વિવશા દેવૈઃ સદ્યો વિભ્રંશિતોદયાઃ
૦૩૩૨૦૨૨૧ તસ્માત્ત્વં સર્વભાવેન ભજસ્વ પરમેષ્ઠિનમ્
૦૩૩૨૦૨૨૨ તદ્ગુણાશ્રયયા ભક્ત્યા ભજનીયપદામ્બુજમ્
૦૩૩૨૦૨૩૧ વાસુદેવે ભગવતિ ભક્તિયોગઃ પ્રયોજિતઃ

૦૩૩૨૦૨૩૨ જનયત્યાશુ વૈરાગ્યં જ્ઞાનં યદ્બ્રહ્મદર્શનમ્
૦૩૩૨૦૨૪૧ યદાસ્ય ચિત્તમર્થેષુ સમેષ્વિન્દ્રિયવૃત્તિભિઃ
૦૩૩૨૦૨૪૨ ન વિગૃહ્ણાતિ વૈષમ્યં પ્રિયમપ્રિયમિત્યુત
૦૩૩૨૦૨૫૧ સ તદૈવાત્મનાત્માનં નિઃસઙ્ગં સમદર્શનમ્
૦૩૩૨૦૨૫૨ હેયોપાદેયરહિતમારૂઢં પદમીક્ષતે
૦૩૩૨૦૨૬૧ જ્ઞાનમાત્રં પરં બ્રહ્મ પરમાત્મેશ્વરઃ પુમાન્
૦૩૩૨૦૨૬૨ દૃશ્યાદિભિઃ પૃથગ્ભાવૈર્ભગવાનેક ઈયતે
૦૩૩૨૦૨૭૧ એતાવાનેવ યોગેન સમગ્રેણેહ યોગિનઃ
૦૩૩૨૦૨૭૨ યુજ્યતેઽભિમતો હ્યર્થો યદસઙ્ગસ્તુ કૃત્સ્નશઃ
૦૩૩૨૦૨૮૧ જ્ઞાનમેકં પરાચીનૈરિન્દ્રિયૈર્બ્રહ્મ નિર્ગુણમ્
૦૩૩૨૦૨૮૨ અવભાત્યર્થરૂપેણ ભ્રાન્ત્યા શબ્દાદિધર્મિણા
૦૩૩૨૦૨૯૧ યથા મહાનહંરૂપસ્ત્રિવૃત્પઞ્ચવિધઃ સ્વરાટ્
૦૩૩૨૦૨૯૨ એકાદશવિધસ્તસ્ય વપુરણ્ડં જગદ્યતઃ
૦૩૩૨૦૩૦૧ એતદ્વૈ શ્રદ્ધયા ભક્ત્યા યોગાભ્યાસેન નિત્યશઃ
૦૩૩૨૦૩૦૨ સમાહિતાત્મા નિઃસઙ્ગો વિરક્ત્યા પરિપશ્યતિ
૦૩૩૨૦૩૧૧ ઇત્યેતત્કથિતં ગુર્વિ જ્ઞાનં તદ્બ્રહ્મદર્શનમ્
૦૩૩૨૦૩૧૨ યેનાનુબુદ્ધ્યતે તત્ત્વં પ્રકૃતેઃ પુરુષસ્ય ચ
૦૩૩૨૦૩૨૧ જ્ઞાનયોગશ્ચ મન્નિષ્ઠો નૈર્ગુણ્યો ભક્તિલક્ષણઃ
૦૩૩૨૦૩૨૨ દ્વયોરપ્યેક એવાર્થો ભગવચ્છબ્દલક્ષણઃ
૦૩૩૨૦૩૩૧ યથેન્દ્રિયૈઃ પૃથગ્દ્વારૈરર્થો બહુગુણાશ્રયઃ
૦૩૩૨૦૩૩૨ એકો નાનેયતે તદ્વદ્ભગવાન્શાસ્ત્રવર્ત્મભિઃ
૦૩૩૨૦૩૪૧ ક્રિયયા ક્રતુભિર્દાનૈસ્તપઃસ્વાધ્યાયમર્શનૈઃ
૦૩૩૨૦૩૪૨ આત્મેન્દ્રિયજયેનાપિ સન્ન્યાસેન ચ કર્મણામ્
૦૩૩૨૦૩૫૧ યોગેન વિવિધાઙ્ગેન ભક્તિયોગેન ચૈવ હિ
૦૩૩૨૦૩૫૨ ધર્મેણોભયચિહ્નેન યઃ પ્રવૃત્તિનિવૃત્તિમાન્
૦૩૩૨૦૩૬૧ આત્મતત્ત્વાવબોધેન વૈરાગ્યેણ દૃઢેન ચ
૦૩૩૨૦૩૬૨ ઈયતે ભગવાનેભિઃ સગુણો નિર્ગુણઃ સ્વદૃક્
૦૩૩૨૦૩૭૧ પ્રાવોચં ભક્તિયોગસ્ય સ્વરૂપં તે ચતુર્વિધમ્
૦૩૩૨૦૩૭૨ કાલસ્ય ચાવ્યક્તગતેર્યોઽન્તર્ધાવતિ જન્તુષુ
૦૩૩૨૦૩૮૧ જીવસ્ય સંસૃતીર્બહ્વીરવિદ્યાકર્મનિર્મિતાઃ
૦૩૩૨૦૩૮૨ યાસ્વઙ્ગ પ્રવિશન્નાત્મા ન વેદ ગતિમાત્મનઃ
૦૩૩૨૦૩૯૧ નૈતત્ખલાયોપદિશેન્નાવિનીતાય કર્હિચિત્

૦૩૩૨૦૩૯૨ ન સ્તબ્ધાય ન ભિન્નાય નૈવ ધર્મધ્વજાય ચ
૦૩૩૨૦૪૦૧ ન લોલુપાયોપદિશેન્ન ગૃહારૂઢચેતસે
૦૩૩૨૦૪૦૨ નાભક્તાય ચ મે જાતુ ન મદ્ભક્તદ્વિષામપિ
૦૩૩૨૦૪૧૧ શ્રદ્ધાનાય ભક્તાય વિનીતાયાનસૂયવે
૦૩૩૨૦૪૧૨ ભૂતેષુ કૃતમૈત્રાય શુશ્રૂષાભિરતાય ચ
૦૩૩૨૦૪૨૧ બહિર્જાતવિરાગાય શાન્તચિત્તાય દીયતામ્
૦૩૩૨૦૪૨૨ નિર્મત્સરાય શુચયે યસ્યાહં પ્રેયસાં પ્રિયઃ
૦૩૩૨૦૪૩૧ ય ઇદં શ ૃણુયાદમ્બ શ્રદ્ધયા પુરુષઃ સકૃત્
૦૩૩૨૦૪૩૨ યો વાભિધત્તે મચ્ચિત્તઃ સ હ્યેતિ પદવીં ચ મે

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે
પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયે
દ્વાત્રિંશોऽધ્યાયઃ ॥ ૩૨ ॥

---

૦૩૩૩૦૦૧૦ મૈત્રેય ઉવાચ
૦૩૩૩૦૦૧૧ એવં નિશમ્ય કપિલસ્ય વચો જનિત્રીસા કર્દમસ્ય દયિતા કિલ દેવહૂતિઃ
૦૩૩૩૦૦૧૨ વિસ્રસ્તમોહપટલા તમભિપ્રણમ્યતુષ્ટાવ તત્ત્વવિષયાઙ્કિતસિદ્ધિભૂમિમ્
૦૩૩૩૦૦૨૦ દેવહૂતિરુવાચ
૦૩૩૩૦૦૨૧ અથાપ્યજોऽન્તઃસલિલે શયાનં ભૂતેન્દ્રિયાર્થાત્મમયં વપુસ્તે
૦૩૩૩૦૦૨૨ ગુણપ્રવાહં સદશેષબીજં દધ્યૌ સ્વયં યજ્જઠરાબ્જજાતઃ
૦૩૩૩૦૦૩૧ સ એવ વિશ્વસ્ય ભવાન્વિધત્તે ગુણપ્રવાહેણ વિભક્તવીર્યઃ
૦૩૩૩૦૦૩૨ સર્ગાદ્યનીહોऽવિતથાભિસન્ધિરાત્મેશ્વરોऽતર્ક્યસહસ્રશક્તિઃ
૦૩૩૩૦૦૪૧ સ ત્વં ભૃતો મે જઠરેણ નાથ કથં નુ યસ્યોદર એતદાસીત્
૦૩૩૩૦૦૪૨ વિશ્વં યુગાન્તે વટપત્ર એકઃ શેતે સ્મ માયાશિશુરઙ્ઘ્રિપાનઃ
૦૩૩૩૦૦૫૧ ત્વં દેહતન્ત્રઃ પ્રશમાય પાપ્મનાં નિદેશભાજાં ચ વિભો વિભૂતયે
૦૩૩૩૦૦૫૨ યથાવતારાસ્તવ સૂકરાદયસ્તથાયમપ્યાત્મપથોપલબ્ધયે
૦૩૩૩૦૦૬૧ યન્નામધેયશ્રવણાનુકીર્તનાદ્યત્પ્રહ્વણાદ્યત્સ્મરણાદપિ ક્વચિત્
૦૩૩૩૦૦૬૨ શ્વાદોऽપિ સદ્યઃ સવનાય કલ્પતે કુતઃ પુનસ્તે ભગવન્નુ દર્શનાત્
૦૩૩૩૦૦૭૧ અહો બત શ્વપચોऽતો ગરીયાન્યજ્જિહ્વાગ્રે વર્તતે નામ તુભ્યમ્
૦૩૩૩૦૦૭૨ તેપુસ્તપસ્તે જુહુવુઃ સસ્નુરાર્યા બ્રહ્માનૂચુર્નામ ગૃણન્તિ યે તે
૦૩૩૩૦૦૮૧ તં ત્વામહં બ્રહ્મ પરં પુમાંસં પ્રત્યક્સ્રોતસ્યાત્મનિ સંવિભાવ્યમ્
૦૩૩૩૦૦૮૨ સ્વતેજસા ધ્વસ્તગુણપ્રવાહં વન્દે વિષ્ણું કપિલં વેદગર્ભમ્

૦૩૩૩૦૦૯૦ મૈત્રેય ઉવાચ
૦૩૩૩૦૦૯૧ ઈડિતો ભગવાનેવં કપિલાખ્યઃ પરઃ પુમાન્
૦૩૩૩૦૦૯૨ વાચાવિક્લવયેત્યાહ માતરં માતૃવત્સલઃ
૦૩૩૩૦૧૦૦ કપિલ ઉવાચ
૦૩૩૩૦૧૦૧ માર્ગેણાનેન માતસ્તે સુસેવ્યેનોદિતેન મે
૦૩૩૩૦૧૦૨ આસ્થિતેન પરાં કાષ્ઠામચિરાદવરોત્સ્યસિ
૦૩૩૩૦૧૧૧ શ્રદ્ધત્સ્વૈતન્મતં મહ્યં જુષ્ટં યદ્બ્રહ્મવાદિભિઃ
૦૩૩૩૦૧૧૨ યેન મામભયં યાયા મૃત્યુમૃચ્છન્ત્યતદ્વિદઃ
૦૩૩૩૦૧૨૦ મૈત્રેય ઉવાચ
૦૩૩૩૦૧૨૧ ઇતિ પ્રદર્શ્ય ભગવાન્સતીં તામાત્મનો ગતિમ્
૦૩૩૩૦૧૨૨ સ્વમાત્રા બ્રહ્મવાદિન્યા કપિલોઽનુમતો યયૌ
૦૩૩૩૦૧૩૧ સા ચાપિ તનયોક્તેન યોગાદેશેન યોગયુક્
૦૩૩૩૦૧૩૨ તસ્મિન્નાશ્રમ આપીડે સરસ્વત્યાઃ સમાહિતા
૦૩૩૩૦૧૪૧ અભીક્ષ્ણાવગાહકપિશાન્જટિલાન્કુટિલાલકાન્
૦૩૩૩૦૧૪૨ આત્માનં ચોગ્રતપસા બિભ્રતી ચીરિણં કૃશમ્
૦૩૩૩૦૧૫૧ પ્રજાપતેઃ કર્દમસ્ય તપોયોગવિજૃમ્ભિતમ્
૦૩૩૩૦૧૫૨ સ્વગાર્હસ્થ્યમનૌપમ્યં પ્રાર્થ્યં વૈમાનિકૈરપિ
૦૩૩૩૦૧૬૧ પયઃફેનનિભાઃ શય્યા દાન્તા રુક્મપરિચ્છદાઃ
૦૩૩૩૦૧૬૨ આસનાનિ ચ હૈમાનિ સુસ્પર્શાસ્તરણાનિ ચ
૦૩૩૩૦૧૭૧ સ્વચ્છસ્ફટિકકુડ્યેષુ મહામારકતેષુ ચ
૦૩૩૩૦૧૭૨ રત્નપ્રદીપા આભાન્તિ લલના રત્નસંયુતાઃ
૦૩૩૩૦૧૮૧ ગૃહોદ્યાનં કુસુમિતૈ રમ્યં બહ્વમરદ્રુમૈઃ
૦૩૩૩૦૧૮૨ કૂજદ્વિહઙ્ગમિથુનં ગાયન્મત્તમધુવ્રતમ્
૦૩૩૩૦૧૯૧ યત્ર પ્રવિષ્ટમાત્માનં વિબુધાનુચરા જગુઃ
૦૩૩૩૦૧૯૨ વાપ્યામુત્પલગન્ધિન્યાં કર્દમેનોપલાલિતમ્
૦૩૩૩૦૨૦૧ હિત્વા તદીપ્સિતતમમપ્યાખણ્ડલયોષિતામ્
૦૩૩૩૦૨૦૨ કિઞ્ચિચ્ચકાર વદનં પુત્રવિશ્લેષણાતુરા
૦૩૩૩૦૨૧૧ વનં પ્રવ્રજિતે પત્યાવપત્યવિરહાતુરા
૦૩૩૩૦૨૧૨ જ્ઞાતતત્ત્વાપ્યભૂન્નષ્ટે વત્સે ગૌરિવ વત્સલા
૦૩૩૩૦૨૨૧ તમેવ ધ્યાયતી દેવમપત્યં કપિલં હરિમ્
૦૩૩૩૦૨૨૨ બભૂવાચિરતો વત્સ નિઃસ્પૃહા તાદૃશે ગૃહે
૦૩૩૩૦૨૩૧ ધ્યાયતી ભગવદ્રૂપં યદાહ ધ્યાનગોચરમ્

૦૩૩૩૦૨૩૨ સુતઃ પ્રસન્નવદનં સમસ્તવ્યસ્તચિન્તયા

૦૩૩૩૦૨૪૧ ભક્તિપ્રવાહયોગેન વૈરાગ્યેણ બલીયસા

૦૩૩૩૦૨૪૨ યુક્તાનુષ્ઠાનજાતેન જ્ઞાનેન બ્રહ્મહેતુના

૦૩૩૩૦૨૫૧ વિશુદ્ધેન તદાત્માનમાત્મના વિશ્વતોમુખમ્

૦૩૩૩૦૨૫૨ સ્વાનુભૂત્યા તિરોભૂત માયાગુણવિશેષણમ્

૦૩૩૩૦૨૬૧ બ્રહ્મણ્યવસ્થિતમતિર્ભગવત્યાત્મસંશ્રયે

૦૩૩૩૦૨૬૨ નિવૃત્તજીવાપત્તિત્વાત્ક્ષીણક્લેશાપ્તનિર્વૃતિઃ

૦૩૩૩૦૨૭૧ નિત્યારૂઢસમાધિત્વાત્પરાવૃત્તગુણભ્રમા

૦૩૩૩૦૨૭૨ ન સસ્માર તદાત્માનં સ્વપ્ને દૃષ્ટમિવોત્થિતઃ

૦૩૩૩૦૨૮૧ તદ્દેહઃ પરતઃ પોષોઽપ્યકૃશશ્ચાધ્યસમ્ભવાત્

૦૩૩૩૦૨૮૨ બભૌ મલૈરવચ્છન્નઃ સધૂમ ઇવ પાવકઃ

૦૩૩૩૦૨૯૧ સ્વાઙ્ગં તપોયોગમયં મુક્તકેશં ગતામ્બરમ્

૦૩૩૩૦૨૯૨ દૈવગુપ્તં ન બુબુધે વાસુદેવપ્રવિષ્ટધીઃ

૦૩૩૩૦૩૦૧ એવં સા કપિલોક્તેન માર્ગેણાચિરતઃ પરમ્

૦૩૩૩૦૩૦૨ આત્માનં બ્રહ્મનિર્વાણં ભગવન્તમવાપ હ

૦૩૩૩૦૩૧૧ તદ્વીરાસીત્પુણ્યતમં ક્ષેત્રં ત્રૈલોક્યવિશ્રુતમ્

૦૩૩૩૦૩૧૨ નામ્ના સિદ્ધપદં યત્ર સા સંસિદ્ધિમુપેયુષી

૦૩૩૩૦૩૨૧ તસ્યાસ્તદ્યોગવિધુત માર્ત્યં મર્ત્યમભૂત્સરિત્

૦૩૩૩૦૩૨૨ સ્રોતસાં પ્રવરા સૌમ્ય સિદ્ધિદા સિદ્ધસેવિતા

૦૩૩૩૦૩૩૧ કપિલોઽપિ મહાયોગી ભગવાન્પિતુરાશ્રમાત્

૦૩૩૩૦૩૩૨ માતરં સમનુજ્ઞાપ્ય પ્રાગુદીચીં દિશં યયૌ

૦૩૩૩૦૩૪૧ સિદ્ધચારણગન્ધર્વૈર્મુનિભિશ્ચાપ્સરોગણૈઃ

૦૩૩૩૦૩૪૨ સ્તૂયમાનઃ સમુદ્રેણ દત્તાર્હણનિકેતનઃ

૦૩૩૩૦૩૫૧ આસ્તે યોગં સમાસ્થાય સાઙ્ખ્યાચાર્યૈરભિષ્ટુતઃ

૦૩૩૩૦૩૫૨ ત્રયાણામપિ લોકાનામુપશાન્ત્યૈ સમાહિતઃ

૦૩૩૩૦૩૬૧ એતન્નિગદિતં તાત યત્પૃષ્ટોઽહં તવાનઘ

૦૩૩૩૦૩૬૨ કપિલસ્ય ચ સંવાદો દેવહૂત્યાશ્ચ પાવનઃ

૦૩૩૩૦૩૭૧ ય ઇદમનુશ઼ૃણોતિ યોઽભિધત્તે કપિલમુનેર્મતમાત્મયોગગુહ્યમ્

૦૩૩૩૦૩૭૨ ભગવતિ કૃતધીઃ સુપર્ણકેતાવુપલભતે ભગવત્પદારવિન્દમ્

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે વૈયાસિક્યામષ્ટાદશસાહસ્ર્યાં

પારમહંસ્યાં સંહિતાયાં તૃતીયસ્કન્ધે કાપિલેયોપાખ્યાને

ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૩૩ ॥

॥ તૃતીયઃ સ્કન્ધઃ સમાપ્તઃ ॥

Available from Bhagvat Purana (Skandha 3, adhyAya 23-33.

*Kapila Gita*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*